श्रीणन्तो गोभिर्– (सा. १३१४d–५) इति सपादर्चि **श्रीणाऽ३१ । तोऽ३गो । भिः** (ऊ. सं २६७) इति **यौधाजयं** नाम साम भवति ॥५॥

उहुवा अस्य सिष्ठम् ॥६॥

अस्य प्रेषा–(सा. १३९९–१४०१) इति तृचे **उहुवाइ । अस्याऽ३४औहोवा । प्रेषा** (ऊ. सं. २६८) इति **वासिष्ठं (पूर्ववासिष्ठं वा)** साम, ॥६॥

यो रा वर्तः ॥७॥

यो राजा चर्षणीनाम्–' (सा. ९३३–४) इति तृचोः **योराऽ३जाऽ३चर्षणीनोवा** (ऊ. सं. २६९) **इत्यभीवर्त**संज्ञं साम ॥७॥

स्वास्वौर्णाद्यसुज्ञाने ।।८।।

स्वासु स्वस्वप्रकृतिषु **परि प्रिया दिवः**– (सा ६३५–७) इति तृचेऽधिगतं **परिप्रियादि-व४कावोः (ऊ. सं.२७०) इत्यौर्णाय वाद्यम्, सोमः पुनानः**- (सा. ६४०–२ इति तृचेऽध्यूढं **सोम४ पुना । नऊमिणा** (ऊ. स. २७१) इति **सुज्ञानं** च सामना भवतः ।।८।।

पुरस्त्वाष्ट्र्यूर्ध्वेडम् ।।९।।

पुरोजिती वो– (सा. ६९७–९) इति तृचे **पुरोजितीवोअन्धसा** (ऊ. सं. २७२) इत्यूर्ध्वेडन्त्वाष्ट्री**साम** गीयते ।।९।।

स्वासु लौशाद्यैडशुद्धीये ।।१०।।

स्वासु योनिष्विमे सामनी गीयेते । **प्रो अयासीद्**– (सा. ११५२–४) इति तृचे **प्रोअयासीद्** (ऊ सं. २७३) इति **लौशाद्यम्, एतो न्विन्द्र**ँ**स्तवाम**– (सा. १४०२–४) इति तृचे **एतोन्विद्र**ँ**स्तवाऽ३मा** (ऊ. सं. २७४) इत्यैडशुद्धाशुद्धीयं चेति ।।१०।।

अर्षा सन्तनि ।।११।।

अर्षा सोम– (सा. ९९४–६) इति तृचे **अर्षाहाउ । सोमद्युमाऽ३१२वाऽ२३ताऽ२३४ माः** (ऊ. सं. २७५) इति **सन्तनोति** साम गीयते ।।११।।

अभि सो मानवानूपवास्राणि ।।१२।।

अभि **सोमासः**– (सा. ८५६–८) इति तृचे **होवाइ।अभिसोमासआयवः** (ऊ. सं. २७६) इति **मानवोत्तरम्, अभीअभि । सोमासऽ३आयाऽ१वाऽ२ः** (ऊ. सं. २७७) इत्यानूपवाध्य्रश्वम्, **अभिसोमासआ । हाऽ३हाऽ३** (ऊ. सं. २७८) इति **वास्रं** चेति त्रीणि सामानि गीयन्ते ।।१२।।

अभि त्रि सम्पा ।।१३।।

अभि **त्रिपृष्ठम्**– (सा. १४०८–१०) इति तृचे **ओऽ३हा । ओहाइयाऽ२ । ओऽ३हाऽ३ए अभित्रिपा** (ऊ. सं. २७९) इति **सम्पा**संज्ञं साम गीयते ।।१३।।

यशा वर्तः ।।१४।।

त्वमिन्द्र यशाः– (सा.१४११–२) इति **ऋचोस्तुवाऽमाऽ३इन्द्रयशाअसोवा** (ऊ.सं. २८०) इत्यभीवर्तसंज्ञं साम भवति ।।१४।।

असा गौषूक्तम् ।।१५।।

असाव्यꣳशुः– (सा. १००८–१०) इति तृचे **असाव्यꣳशुमौ** (ऊ. सं. २८१) इति **गौषूक्तं** साम गीयते ।।१५।।

प्राणा ज्ञाने तृतीयः।।१६।।

प्राणा शिशुः–(सा. १०१३–२) इति तृचे **प्राणाशिशूः । महीनाम्** (ऊ.सं. २८२) इति **सुज्ञानं** नाम साम गीयते ।।१६।।

अयं **तृतीयो** विंशः ।।

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगाने संवत्सरपर्वणि चतुर्दशः खण्डः ।।१४।।

[ऊहगाने सवत्सरपर्वणि पञ्चदशः खण्डः]

एतास्वेव दासम् ।।१।।

एतासु प्राणाशिशुर्महीनाम्– (सा. १०१३–५) इति तिसृषु **ऋक्ष्वेव प्राणाऽ३१। शिशुऽ ३१२३४ः** (ऊ. सं. २८३)इति **दैवोदासं** साम गीयते ।।१।।

पवस्व वा रयिष्ठम् ।।२।।

पवस्व वाजसातये– (सा. १०१६–८) इति तृचे गीयमानं **पवस्ववा । जासाताऽ३याइ** (ऊ. सं. २८४) इति साम **रयिष्ठमि**त्युच्यते ।।२।।

असा लौशोत्तरम् ।।३।।

असावि सोमो– (सा. १३१६–८) इति तृचे **असाविसोमोअरुषोवृषा** (ऊ. सं. २८५) इति **लौशोत्तरं (द्विरभ्यासं लौशं वा)** साम भवति ।।३।।

यजिष्ठं साध्यम् ।।४।।

यजिष्ठं त्वा– (सा.१४१३–४) इति ऋचोः **याऽ५जि । ष्ठन्त्वाऽइवाऽ३वृमहाइ** (ऊ. सं.२८६) इति **साध्यमिति** साम गीयते ।।४।।

इन्द्राश्वसूक्तम् ॥५॥

इन्द्रायेन्द्रो– (सा. १०७६–८) इति तृचे गीयमानं **आऔहोवाहाइ । इन्द्रायेन्दाउ** (उ.सं. २८७) इति यद् गानं **तदाश्वसूक्त**मिति कथ्यते ॥५॥

मृज्य मन्तत्रिणिधनायास्ये ॥६॥

मृज्यमानः सुहस्त्या– (सा. १०७९–८०) इति ऋचोरध्यूढे **मृज्यमानस्सुहस्तिया** (ऊ. सं. २८८) इति **समन्तम्**, **मृज्यमानस्सुहाहाउहोवा** (ऊ. सं. २८९) इति **त्रिणिधनायास्यं** चेति द्वे सामनी भवतः ॥६॥

साकꣳसिष्ठम् ॥७॥

साकमुक्षो– (सा. १४१८–२०) इति तृचे **औहोवाहाऽ३होइ । इहा । साकमुक्षो** (ऊ. सं. २९०) इति **वासिष्ठ**मिति साम गीयते ॥७॥

पिबा वर्तः ॥८॥

पिबा सुतस्य– (सा. १४२१–२) इति ऋचोर्गीतं **पिबाऽ३सूऽ३तस्यरसिनोवा** (ऊ. सं. २९१) इत्य**भीवर्त**संज्ञियमानं साम भवति ॥८॥

परिस्वैध्मवाहम् ॥९॥

परि स्वानो–(सा. १०९३–५) इति तृचे **परिसुवाइहा** (ऊ. सं. २९२) **इत्यैध्मवाह**मिति साम गीयते ॥९॥

तं वर्चि ज्ञानकाशीते ॥१०॥

तं वः सखायो– (**सा. १०९८**) इत्यस्यामृचि **तंवस्सखा** (ऊ. सं. २९३) इति **सुज्ञानम्**, **तंवस्सखा । योमदाऽ२३याऽ३४** (ऊ. सं. २९४) इति **काशीतं** चेति द्वे सामनी गीयेते ॥१०॥

स्वासु रुतां धेनु ॥११॥

स्वासु योनिषु **त्रिरस्मै सप्त धेनवः–** (सा. १४२३–५) इति ऋक्षु **त्राऽ२३४इ** ः। **अस्मैसप्तधेनवोदुदौ** (ऊ. सं. २९५) इति **मरुतांधेनु**संज्ञितं साम गीयते ॥११॥

प्रसोर्चि वर्तः ॥१२॥

प्र सोम– (सा. ७६७) इत्यस्यामृचि **प्रसोऽ३माऽ३देववीतयोवा** (ऊ. सं. २९६) इत्य**भीवर्त**संज्ञं साम भवति ॥१२॥

उत्सः प्रत्नं वर्तलेये ॥१३॥

उत्सो देवः– (सा. ६७५d–६ab) इति त्रिपादेषु **उत्सोऽ३देऽ३वोहिरण्ययोवा** (ऊ. सं. २९७) **इत्यभीवर्तसंज्ञम्, प्रत्न**ꣳ**सधस्थम्–** (सा. ६७६bcd) इति पादोनर्चि **प्रत्न**ꣳ**साऽ३धस्थ-मासदात्** (ऊ. सं. २९८) इति **कालेयसंज्ञं** च सामनी भवतः ॥१३॥

तथाभिसोमत्सपरिधींदुहेति च चतुर्थः ॥१४॥

तथा पूर्वोक्तप्रकारेण **अभिसोमादिषु** अभीवर्तकालेये क्रमशो भवेयुः । यथा **अभि सोमासः–** (सा. ८५६) इत्यस्यामृचि **अभाऽ३इसोऽ३मासआयबोवा** (ऊ. सं. २९९) **इत्यभीवर्तसाम, मत्सरासो मदच्युतः–**(सा. ८५६d–७ab) इति ऋक्पादत्रये मध्यमस्तोत्रियायां **मत्सराऽ३सोम-दच्युताः** (ऊ. सं. ३००) इति **कालेयम्, परिधी**ꣳ**रति ताँ इहि–** (सा. ९२२d–३ab) इति ऋक्पादत्रये मध्यमस्तोत्रीयायां **पराऽ३इधाऽ३इ**ꣳ**रातिता**ꣳ**इहोवा** (ऊ. सं. ३०१) **इत्यभीवीर्तः दुहानो बभ्र ऊधनि** (सा. ९२३bcd) इति पादोनर्चि **दुहानोऽ३बभ्रऊधनाइ** (ऊ. सं. ३०२) इति **कालेयं** च ॥१४॥

अयं **चतुर्थो** विंशः ॥

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगाने संवत्सरपर्वणि पञ्चदशः खण्डः ॥१५॥

[ऊहगाने दशरात्रपर्वणि षोडशः खण्डः]

हाउ नित्रम् ॥१॥

सोमꣳ**पवते–** (सा. ९४३–५) इति तृचे **हाउ जनत् । सोम**ꣳ**पवा** (ऊ. सं. ३०३) इति **जनित्रं** साम गीयते ॥१॥

प्र ते लौशाद्यम् ॥२॥

प्र त आश्विनीः– (सा. ८८६–८) इति तृचे **प्रतआश्वि । नी॰पवमाऽ२३** (ऊ. सं. ३०४) इति **लौशाद्यं** साम गीयते ॥२॥

मन्द्र-दुग्ध वर्तलेये ॥३॥

मन्द्रया याति धारया– (सा. ९९७d–८ab) इति ऋक्पादत्रये मध्यमस्तोत्रीयायां **मन्द्राऽ३यातिधारयोवा** (ऊ. सं. ३०५) इति **अभीवर्तसंज्ञम्, सोमो दुग्धाभिरक्षाः–** (सा.

९९८bcd) इति पादोनर्चि उत्तमस्तोत्रीयायां **सोमोवुऽ३ग्धाभिरक्षाः** (ऊ. सं. ३०६) इति **कालेयाभिधं** च सामनी भवतः ।।३।।

इन्दुः सम्पा ।।४।।

इन्दुर्वाजी– (सा. १०१९–२१) इति तृचे **ओऽ३हाइ । ओऽहा । इयाऽ२ । ओऽ३हाऽ३ए । इन्दुर्वाजी** (ऊ. सं. ३०७) इति **सम्पा**नाम साम गीयते ।।४।।

पवस्व त्वाष्ट्री द्विरभ्यस्तम् ।।५।।

पवस्व वाजसातये– (सा. १०१६–८) इति तृचे **पव । स्वावाऽ३** (ऊ. सं. ३०८) इति **द्विरभ्यस्तं त्वाष्ट्रीसामा**भिधं साम भवति ।।५।।

गोविल्लौशोत्तरम् ।।६।।

गोवित्पवस्व– (सा. ९५५–७) इति तृचे **गोवित्पवस्ववसुविद्धि** । (ऊ. सं. ३०९) इति **लौशोत्तरं (द्विरभ्यासं लौशं** वा) साम गीयते ।।६।।

पवमा वृषो वर्तलेये ।।७।

पवमानाभ्यर्षसि– (सा. १०७९d–८०ab) इति ऋक्पादत्रये मध्यमस्तोत्रीयायां **पवाऽ३माऽ३नाभियर्षसोवा** (ऊ. सं. ३१०) **इत्यभीवर्त**संज्ञम्, **वृषोअभिक्रदद्वने**– (१०८०bcd) इति पादोनर्चि उत्तमस्तोत्रीयायां **वृषोआऽ३चिक्रदद्वनाइ** (ऊ. सं ३११) इति **कालेय**संज्ञं च सामनी गीयेते ।।७।।

अया पवा सिष्ठम् ।।८।।

अया पवा– (सा. ११०४–६) इति तृचे **औहोवाहाऽ३होइ । इहा । अया पवा** (ऊ. सं. ३१२) इति **वासिष्ठं** साम भवति ।।८।।

ज्योतिर्मरुताम् ।।९।।

ज्योतिर्यज्ञस्य– (सा. १०३१–३) इति तृचे **ज्योऽ२३४। तिर्यज्ञस्यपवतेमधौ** (ऊ सं. ३१३) इति यद्गानं गीयते **तन्मरुतांधेन्विति** कथ्यते ।।९।।

उच्चा सत्रा ।।१०।।

उच्चा ते जातम्– (सा. ६७२–४) इति तृचे गीयमानम् **उच्चाऽ३४।तेजातमन्धसः** (ऊ. सं. ३१४) इति यत्साम वर्तते तद्धि **सत्रासाहीय**मिति कथ्यते ।।१०।।

पुना वर्तः ।।११।।

पुनानः सोम–(सा.६७५–६) इति ऋचोरध्यूढ **पुनाऽ३नाऽ३स्सोमधरयोबा** (ऊ.सं.३१५) **इत्यभीवर्ता**भिधं साम भवति ।।११।।

अभि वायुं पार्थम् ।१२।।

अभि वायुम्– (सा. १४२६–८) इति तृचे **ओऽ३होऽ३होइ।अभिवायूम्** (ऊ. सं. ३१६) इति यत् साम गीयते तत् **पार्थ**मित्युच्यते ।।१२।।

पुरो मधुश्चुज्ञीयबृहदाग्नेयानि ।।१३।।

पुरोजिती वो– (सा. ६९७–९) इति तृचे **पुरोजितीवोअन्धसाऽ२ए** (ऊ. सं. ३१७) इति **मधुश्चुन्निधनम्, पुरोऽ५जि । ताऽ३इवोऽ३अन्धसाः** (ऊ. सं. ३१८) इति **यज्ञायज्ञीयम्, पुरोजितीवोअन्धसः** (ऊ. सं. ३१९) इति **बृहदाग्नेयं** चेति त्रीणि सामानि गीयन्ते ।।१३।।

अभि सो गौङ्गवम् ।।१४।।

अभि सोमासः–(सा. ८५६–७) इति तृचे **अभिसोऽ३मासआयवाः** (ऊ. सं. ३२०) इति **गौङ्गवं** नाम साम गीयते ।।१४।।

प्र हिन्वा यौधा ।।१५।।

प्र हिन्वानः– (सा. ८५७ –८) इति सपादर्चि **प्रहाऽ३१३।न्वाऽ३नः ।** (ऊ. सं. ३२१) इति यत्साम **तद् यौधाजय**मिति निगद्यते ।।१५।।

स्वादि क्षुष्टम्भम् पञ्चमः ।।१६।।

स्वादिष्ठया– (सा. ६८९–९१) इति तृचे **स्वादाऽ५इष्ठ** (ऊ. सं. ३२२) इति **क्षुल्लक-वैष्टम्भं** साम गीयते ।।१६।।

अयं **पञ्चमो** विंशः ।।

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगाने संवत्सरपर्वणि षोडशः खण्डः ।।१६।।

–◆–

[ऊहगाने संवत्सरपर्वणि सप्तदशः खण्डः]

आजा तमम् ।।१।।

आ जामिरत्के– (सा. १३८७) इत्यस्यामृचि **आजामिरत्केअव्यता** (ऊ. सं. ३२३) इत्येकर्च **गौतमसंज्ञं** साम भवति ।।१।।

अभ्यैडं कावम् ।।२।।

अभि प्रियाणि– (सा. ७००–२) इति तृचे **राऽ५ । अभिप्रियाऽ२** (ऊ. सं. ३२४) इत्यादि **ऐडकावसंज्ञं** साम भवति ।।२।।

तोषि मन्तम् ।।३।।

परीतो षिञ्चता– (सा.१३१३–४) इति ऋग्द्वये **परीतोषिञ्चतासुताम्** (ऊ. सं. ३२५) इत्यादि **समन्तसंज्ञं** साम भवति ।।३।

य ओ सितम् ।।४।।

य ओजिष्ठस्तमा– (सा. ८२०) इत्यस्यां **यओजिष्ठस्तमा । भरा** (ऊ. सं. ३२६) इति **आसिताद्यं** साम भवति ।।४।।

वृषा याममैडम् ।।५।।

वृषा मतीनाम्– (सा. ८२१–३) इति तृचे **वृषामातीऽ२३ । ना॰ पवाताऽ२३इ** (ऊ. सं. ३२७) इत्यादि **ऐडयामसंज्ञं** साम भवति ।।५।।

घ त्वा वर्तः ।।६।।

वयं घ त्वा– (सा. ८६४–६) इति तृचे **वयाऽ३घाऽ३त्वासुतावन्तोवा** (ऊ. सं. ३२८) इत्यादि **अभीवर्तसंज्ञं** साम भवति ।।६।।

तिस्रो हितम् ।।७।।

तिस्रो वाच उदीरते– (सा. ९६९–७२) इति तृचे **तिस्रोवाचउत्** (ऊ. सं. ३२९) इत्यादि **संहितसंज्ञं** साम भवति ।।७।।

सह त्वाष्ट्री ॥८॥

सहस्रधार४पवते– (सा. ८७४) इत्यस्यामृचि **सहस्रधाऽ३हा । र४पवाताऽ२इ** (ऊ. सं. ३३०) **स्वारंत्वाष्ट्री** साम भवति ॥८॥

अस्य सत्रा ॥९॥

अस्य प्रत्नाम्– (सा. ७५५–७) इति तृचे **अस्याऽ३४ । प्रत्नामनुद्युतम्** (ऊ. सं. ३३१) इति **सत्रासाहीयं** साम गीयते ॥९॥

तवोत्सेधः ॥१०॥

तवाह७ँसोम– (सा. ६२२–३) इति ऋचोस्**तवाह७ँसोमरारण** (ऊ. सं. ३३२) इत्**युत्सेध**नामकं साम भवति ॥१०॥

दुहा पृश्नि ॥११॥

दुहानो बभ्र ऊधनि– (सा. ६२३bcd) इति पादोनर्चि तृतीयस्तोत्रीयायां **दुहानोऽ२३ बभ्रऊधनिहाउ** (ऊ. सं. ३३३) इति **पृश्नि**संज्ञं (**भारद्वाजस्य पृश्नि**संज्ञं वा) साम गीयते ॥११॥

शिशुं पार्थम् ॥१२॥

शिशुञ्जज्ञानम्– (११७५–७) इति तृचे **ओऽ३होऽ३होइ । शिशुंजज्ञा** (ऊ. सं. ३३४) इति **पार्थं** साम गीयते ॥१२॥

द्युम्नं प्राणा सफश्रुध्यंकच्चौँ ॥१३

अभि **द्युम्नम्–** (सा. १०११) इत्यस्यामृचि **अभिद्यूऽ३म्नंबृ । हद्याऽ२३४ शाः** (ऊ. सं. ३३५) इति **सफम्, प्राणाशिशुर्** (सा. १०१३) इत्यस्यां **प्राणाशिशूऽ२र्मं । हीनोवा** (ऊ. सं. ३३६) इति **श्रुध्यं** च सामनी गीयेते ॥१३॥

इन्दुनिषेधः ॥१४॥

इन्दुरश्वो न कृत्व्यः– (६९८d–९) इति सपादर्चि तृतीयस्तोत्रीयायाम **इन्दुरश्वोनाऽ३ कृत्वियाः** (ऊ. सं. ३३७) इति **निषेधा**ख्यं साम भवति ॥१४॥

धर्ता कावम् ।।१५।।

धर्ता दिवः– (सा. १२२८–३०) इति तृचे **धर्तोवा । दिव२पवतेका** (ऊ. सं. ३३८) इति यद् गानं तत् **कावमिति** कथ्यते ।।१५।।

क्रतुँ स्तम्भम् ।।१६।।

इन्द्र क्रतुन्न आ भर– (सा. १४५६–७) इति ऋचोरिन्द्रक्रतोहाइ । **नआभरोवा** (ऊ. सं. ३३९) इति **महावैष्टम्भं** साम गीयते ।।१६।।

सखा पौष्कलम् ।।१७।।

सखाय आ– (सा.११५७–९) इति तृचे **साखायाऽ३आनि** (ऊ. सं. ३४०) इति **पौष्कलं** साम भवति ।।१७।।

क्रतुँ श्यैतम् ।।१८।।

इन्द्र क्रतुन्न आ भर– (सा. १४५६–७) इति ऋचोरध्यूढम् **इन्द्रक्रतुन्नआ** (ऊ. सं. ३४१) इति **शैत्यं** साम गीयते ।।१८।।

अच्छ श्रुध्ये ।।१९।। षष्ठः ।।६।।

इन्द्रमच्छ (सा. ६९४–६) इति तृचे **इन्द्रमच्छाऽ२सु** (ऊ. सं ३४२) इति **श्रुध्यनामकं** साम गीयते ।।१९।।

अयं **षष्ठो** विंशः

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगाने संवत्सरपर्वणि सप्तदशः खण्डः ।।१७।।

[ऊहगाने संवत्सरपर्वणि अष्टादशः खण्डः]

क्रतुं धसम् ।।१।।

इन्द्र क्रतुन्नः– (सा. १४५६–७) इति ऋचोर्गीयमानम् **आऽ२३४इ । द्रक्रतुन्नआ** (ऊ. सं ३४३) इति यद् गानं तत् **नौधसमिति** निगद्यते ।।१।।

पवते पौष्कलम् ॥२॥

पर्वते हर्यतः– (सा. ७७३) इत्यस्यामृचि **पर्वतेऽ३हर्यं । तोहाऽ२३४राइः** (ऊ.सं. ३४४) इति **पौष्कलं** नाम साम गीयते ॥२॥

अस्यामही ॥३॥

अस्य प्रत्नाम्– (सा. ७५५–७) इति तृचे **अस्याप्राऽ३त्नामनुद्युतम्** (ऊ. सं. ३४५) **इत्यामहीयवसंज्ञं** साम भवति ॥३॥

तोषि लेयमृचि ॥४॥

परीतो षिञ्चता– (सा. १३१३) इत्यस्यामृचि **परीतोऽ३षिञ्चतासुतम्** (ऊ. सं. ३४६) इति **कालेयं** साम गीयते ॥४॥

अयँसो पार्थम् ॥५॥

अयँसोमः– (सा. १४७१–३) इति तृचे **ओऽ३होऽ३होइ। अयँसोमाः** (ऊ. सं. ३४७) इति **पार्थाभिधं** साम भवति ॥५॥

स्वानो हितम् ॥६॥

परि स्वानः(सा. १०९३–५) इति तृचे **परिसुवानः** । गाऽ२ **इरिष्ठाः** (ऊ. सं. ३४८) इति यत् साम भवति तत् **संहित**मिति कथ्यते ॥६॥

पव सत्रा ॥७॥

पवस्व मधुमत्तमः– (सा. ६९२–३) इति ऋचोः **पवाऽ३४। स्वमधुमत्तमः** (ऊ. सं. ३४९) इति **सत्रासाहीयं** साम गीयते ॥७॥

पर्यू देव्यम् ॥८॥

पर्यूषु प्र (सा. १३६४–६) इति तृचे **पाऽ५रि । ऊषूऽ३प्राऽ३धन्वा** (ऊ. सं. ३५०) इति **महावामदेव्यं** नाम साम गीयते ॥८॥

इन्दुर्यद्वा ॥९॥

इन्दुरश्वो न– (सा. ६९८d–९) इति सपादर्चि तृतीयस्तोत्रीयायाम् **इन्दुरश्वोनकृत्वियः** (ऊ. सं. ३५१) इति **यद्वाहिष्ठीयोत्तरं** साम भवति ॥९॥

परि प्र ध वारम् ॥१०॥

परि प्र धन्व– (सा. १३६७–९) इति तृचे **परिप्रधाऔहोहाइ** (ऊ. सं. ३५२) **इति वारवन्तीयं** साम भवति ॥१०॥

सूर्यस्य कावं तृचे ॥११॥

सूर्यस्येव– (सा. १३७०–२) इति तृचे **सूर्योवा । स्येवरश्मयोद्रा** (ऊ. सं. ३५३) इति **कावसंज्ञं** साम गीयते ॥११॥

पवमा पौरुमीढम् ॥१२॥

पवमानाभ्यर्षसि (सा. १०७९d–८०ab) इति पादत्रयात्मिकायां मध्यमस्तोत्रीयायां **पवमा । नाभा२३४औहोवा** (ऊ. सं.३५४) इति यद् गानं तत् **पौरुमीढमि**त्युच्यते ॥१२॥

मन्द्र नवाद्यम् ॥१३॥

मन्द्रया याति (सा. ९९७d–८ab) इति पादत्रयात्मिकायां मध्यमस्तोत्रीयायां **मन्द्रयाया । तिधारा२३४या** (ऊ. सं. ३५५) इति **मानवाद्यं** साम गीयते ॥१३॥

परिधी नित्रम् ॥१४॥

परिधीॅरतिताॅइहि (सा. ९२२d–३ab) इति पादत्रयात्मिकायां मध्यमायां स्तोत्रीयायां **परिधाइ३ॅरातिताॅइहाइ** (ऊ. सं. ३५६) इति **जनित्राद्यं** साम गीयते ॥१४॥

अभि सो द्वाजम्॥१५॥

अभि सोमासः– (सा. ८५६) इत्यस्यामृचि **अभिसोमा । सआया१वा२ः** (ऊ. सं. ३५७) इति **भारद्वाजं** साम भवति ॥१५॥

उत्सः सिष्ठं यद्वयमेनामेति ॥१६॥

उत्सो देवो हिरण्ययः– (सा. ६७५d–६ab) इति ऋक्पादत्रयात्मिकायां मध्यमस्तोत्रीयायाम् **उत्सोदेवोहिर । ण्यया ओ२३४वा** (ऊ. सं. ३५८) इति **इडावासिष्ठं (वासिष्ठं वा)** साम भवति । इदमत्रावगन्तव्यम् । **यदिदमेव** वासिष्ठं सामाहीनपर्वणि **वयमेनमिदा–** (सा. १६६१–२) इति ऋचोर्गीयते तत्तु प्रत्यक्षत **इडावासिष्ठमि**त्युच्यते । यतो **वयमेनमिदे**त्यत्र श्रूयते य **इडा**शब्दस्तमाश्रित्य खल्वयं व्यपदेश **इडावासिष्ठमि**त्यस्य साम्नः । अत्र पर्वणि परम् **उत्सो देव** इति मध्यमस्तोत्रीयायां **गीयमानस्य साम्न** इयं संज्ञा त्वप्रत्यक्षतः क्रियते । रूढेत्यर्थः । यथा **यज्ञायज्ञा वो अग्नये–** (सा. ७०३–४)

इति ऋगध्यूढस्य साम्नो **यज्ञायज्ञीयम्** (ऊ. द.१४) **इति समाख्या** चान्वर्था प्रत्यक्षेत्युच्यते। सेयमेव समाख्या **पुनानः सोम धारय**– (सा. ६७५–६) इति ऋगध्यूढसाम्न्यपि भवति। परं सा नान्वर्था। अतोऽप्रत्यक्षा च। नहि दृश्यते यज्ञायज्ञशब्दोऽस्मिन् साम्नि ॥

वयमेनम्– (सा. २७२) इत्यस्यामृचि ग्रामेगेये यद् गानं वसिष्ठस्येन्द्रस्य वा वैरूपमिति गीयते तद्रूपमेव भवेदिदं वासिष्ठमिदापूर्वं नाम साम ॥१६॥

प्रसो गवशुद्धीय एकर्च्चाः ॥१७॥

प्र सोम देववीतये– (सा. ७६७) इत्यस्यां **प्रसोमा**ऽ३**देववीतयाइ** (ऊ. सं. ३५९) इति **गौङ्गवम्, प्रसोमदेववीतयाइ** (ऊ.सं. ३६०) इति **शुद्धाशुद्धीयं (पदनिधनशुद्धाशुद्धीयं वा)** चेति सामद्वयं गीयते ॥१७॥

ऋतुं मीढम् ॥१८॥

इन्द्र ऋतुन्नः–(सा. १४५६–७) इति ऋचोरधिष्ठितम् **इन्द्रऋ। तुन्ना**ऽ३४**औहोवा** (ऊ. सं. ३६१) इति **पौरुमीढं** साम भवति ॥१८॥

तं वर्चि श्रुध्ये ॥१९॥ सप्तमः ॥७॥

तं वः सखायः– (सा. १०९८) इत्यस्यामृचि **तंवस्सखा**ऽ२**यः** (ऊ. सं ३६२) इति श्रुध्यं साम गीयते ॥१९॥

अयं सप्तमो विंशः ॥

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगाने संवत्सरपर्वणि अष्टादशः खण्डः ॥१८॥

–◇–

[ऊहगाने संवत्सरपर्वणि एकोनविंशः खण्डः]

ऋतुं मानवाद्यम् ॥१॥

इन्द्र ऋतुन्नः– (सा. १४५६–७) इति ऋचोर्गीयमानम् **इन्द्रऋतुम्। न आभा**ऽ२३४**रा** (ऊ. सं. ३६३) इति यत्साम तन्मानवाद्यमिति निगद्यते ॥१॥

प्राणा पौष्कलम् ।।२।।

प्राणा शिशुर्– (सा. १०१३–५) इति तृचे **प्राणाशाऽ३इशुः** (ऊ. सं ३६४) इति **पौष्कलं** साम भवति ।।२।।

क्रतुं जनित्रम् ।।३।।

इन्द्र **क्रतुन्नः**– (सा. १४५६–७) इति ऋचोरध्यूढम् **इन्द्रक्राऽ३तुन्न आभरा** (ऊ. सं ३६५) इति यत् साम तत् **जनित्राद्य**मिति कथ्यते ।।३।।

सोमः श्रुध्यम् ।।४।।

सोम॰पुनानः– (सा. ६४०–२) इति तृचे **सोम॰पुनाऽ२नः । ऊर्मिणोवा** (ऊ. सं. ३६६) इति **श्रुध्यं** साम गीयते ।।४।।

क्रतुं द्वाजम् ।।५।।

इन्द्र **क्रतुन्नः**– (सा. १४५६–७) इति ऋचोरधिष्ठितम् **इन्द्रक्रतुम्** (ऊ. सं ३६७) इति **भारद्वाजसंज्ञं** साम भवति ।।५।।

अभि सो तिथम् ।।६।।

अभि **सोमासः**– (सा. ८५६–७) इति ऋचोर्गीयमानम् **अभिसामोहाइ** (ऊ. सं. ३६८) इति साम **मैधातिथमित्युच्यते** ।।६।।

तोषि दुक्थम् ।।७।।

परीतो षिञ्चता– (सा. १३१३–४) इति ऋचोः **परीतोषिञ्च । ताऽ२सुताम्** (ऊ. सं. ३६९) इति **बार्हदुक्थं** साम गीयते ।।७।।

यस्ते सोमसामाध्यर्धेडम् ।।८।।

यस्ते मदो– (सा. ८१५–७) इति तृचे **यस्तेमदोवरेणियाऽ३ए** (ऊ. सं. ३७०) **इत्यध्यर्धेड**ऌ**सोमसाम** भवति ।।८।।

अदब्धः सु माण्डवम् ।।९।।

अदब्धः सुरभिन्तरः–(**सा. १३१४**bcd) इति पादोनर्चि तृतीयस्तोत्रीयायाम् **अदब्धःस्सूऽ२ । रभिन्तराऽ२ः** (ऊ. सं. ३७१) इति **ऐडमाण्डवं** साम भवति ।।९।।

अस्य जरा ।।१०।।

अस्य प्रत्नाम्– (सा. ७५५–७) इति तृचे **अस्यप्रत्नोवा** (ऊ. सं. ३७२) इति **जराबोधीयं** साम गीयते ।।१०।।

तोषि रवम् ।।११।।

परीतो षिञ्चता– (सा. १३१३–४) इति ऋचोः **परीतोषिंञ्चाऽ३तासूऽ२३४ताम्** (ऊ. सं. ३७३) इति **रौरवं** साम भवति ।।११।।

विश्वे देवा निहवः ।।१२।। संवत्सरः ।।२।।

विश्वे देवा मम– (सा. ६१०) इत्यस्यामृचि **आइहीऽ३। आइहा। एहिया। ओऽ२३४वा। हाइ। विश्वेदेवाममभ्शृण्वन्तुऽ३याज्ञाऽ३म्** (ऊ. सं. ३७४) इति **निहवसंज्ञं** साम भवति ।।१२।।

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगाने संवत्सरपर्वणि एकोनविंशः खण्डः ।।१९।।

इति श्रीशेणईकुलोत्पन्नेन बेल्लिक्कोत्तुग्रामजन्मना जनार्दनशर्मणस्तनूजेन रामचन्द्रशर्मणा प्रणीतायां साधनाख्यायां पुष्पसूत्रव्याख्यायां प्रथमे प्रपाठक ऊहगाने संवत्सरपर्व समाप्तम् ।।२।।

ऊहगान एकाहपर्व

विंशः खण्डः

प्रति नानदम् ॥१॥

प्रत्यस्मै पिपीषत–(सा. १४४०–२) इति तृचे **प्रत्यस्मैपिपो । षताऽ३इ** (ऊ. सं. ३७५) इति **नानदं** साम गीयते ॥१॥

आ नो विश्वा श्यैतम् ॥२॥

आ नो विश्वासु– (सा. १४९२–३) इति ऋचोर्गीयमानम् **आनोविश्वासु** (ऊ. ए. ३७६) इति साम **श्यैत**मित्यभिधीयते ॥२॥

पुरो दलम् ॥३॥

पुरोजिती वो– (सा. ६९७–८) इति तृचे **पुरोजिताइ** (ऊ. ए. ३७७) इत्**यौदल**संज्ञं साम भवति ॥३॥

स्वादोः श्यैतम् ॥४॥

स्वादोरित्था (सा. १००५–७) इति तृचे **स्वादोरित्थाविषू** (ऊ. ए. ३७८) इति **श्यैता**भिधं साम गीयते ॥४॥

पवस्वेडानां कर्च्चः ॥५॥

पवस्व मधुमत्तमः– (सा. ६९२) इत्यस्यामृचि **औहोइहवाऽ३होइ । पवस्वमाऽ३धूऽ४मत्तमः** (ऊ. ए. ३७८) **इतोडानाᳪसंक्षार**संज्ञं साम भवति ॥५॥

प्रत्नं यौधा ॥६॥

प्रत्नं पीयूषम्– (सा. १४९४–६) इति तृचे **प्रत्नाऽ३म् । पोऽ३यू । षम्**– (ऊ. ए. ३८०) इति **यौधाजय**संज्ञं साम भवति ॥६॥

शिशुं देव्यम् ॥७॥

शिशुंजज्ञानम्– (सा. ११७५–७) इति तृचे **शाऽ५इशुम्** (ऊ. ए. ३८१) इति **महादेव्यं** साम गीयते ॥७॥

कया स्वारं पर्णम् ॥८॥

कया नश्चित्र आ भुवत्– (सा. ६८२–४) इति तृचे **कयानश्चित्रआभूऽ३वात्** (ऊ ए. ३८२) इति **स्वारंसौपर्णं** साम भवति ॥८॥

परि प्र धन्व सफमेकस्याम् ॥९॥

परि प्र धन्व (सा. १३६७) इत्येकस्यामृचि **परिप्राऽ३ध** (ऊ. ए. ३८३) इति **सफसंज्ञं** साम गीयते ॥९॥

उच्चा स्वारसौपर्णशाक्वरे ॥१०॥

उच्चा ते जातमन्धसः– (सा. ६७२–४) इति तृचे **उच्चातेजातमन्धाऽ३साः** (ऊ. ए. ३८४) इति **स्वारंसौपर्णम्, उच्चा । तेजातमन्धसाः** (ऊ. ए. ३८५) इति **शाक्वरवर्णं** च सामनी गीयेते ॥१०॥

पुना ष्टम्भलेये ॥११॥

पुनानः सोम धारय– (सा. ६७५–६) इति ऋचोः **पुनानस्सोहाइ** (ऊ. ए. ३८६) इति **महावैष्टम्भम्, पुनानस्सोमधारया** (ऊ. ए. ३८७) इति **कालेयं** चेति सामद्वयं गीयते ॥११॥

श्राय भरम् ॥१२॥

श्रायन्त इव– (सा. १३१९–२०) इति ऋचोः **श्रायाऽ३न्तोऽ३इवसूरियोवा** (ऊ. ए. ३८८) इति **सौभरं** साम भवति ॥१२॥

तरो वारम् ॥१३॥

तरोभिर्वः– (सा. ६८७–८) इति ऋचोस्**तरोभिर्वाऔहोहाइ** (ऊ. ए. ३८९) इति **वारवन्तीयं (वारवन्तीयोत्तरं वा)** साम गीयते ॥१३॥

अच्छैकस्यां पुरस्तृचे यास्यमैडम् ॥१४॥

इन्द्रमच्छ– (सा. ६९४) इत्यस्यामृचि **आइन्द्राम् । अच्छा** (ऊ. ए. ३९०) इति, **पुरोजिती वो**–(६९७–९) इति तृचे **आइपुराः** (ऊ. ए. ३९१) इति च द्वे **अप्यैडमायास्ये** सामनी भवतः ॥१४॥

स्वानो जरा ॥१५॥

परि स्वानो– (सा. १०९३–५) इति तृचे **परिसुवोवा** (ऊ. ए. ३९२) इति **जराबोधीयं** साम भवति ॥१५॥

वर्णमिषम् ।।१६।।

इषं तोकाय– (सा. ६६६) इत्यस्यामृचि आइषाम् (ऊ. ए. ३६३) इति शाक्वरवर्णं साम भवति ।।१६।।

पुना वषट्कर्चे ।।१७।। प्रथमः ।।१।।

पुनानः सोम– (सा. ६७५) इत्यैकस्यामृचि पुनानस्सोमधारया (ऊ. ए. ३६४) इति वषट्कारणिधनं साम गीयते ।१७।।

अयं प्रथमो विंशः ।।

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगान एकाहपर्वणि विंशः खण्डः ।।२०।।

[ऊहगान एकाहपर्वणि एकविंशः खण्डः]

तृचे मच्छौपगवम् ।।१।।

इन्द्रमच्छ– (सा. ६८४–६) इति तृचे इन्द्रमच्छा । सुताइमाइ (ऊ. ए. ३६५) इत्यौपगवाख्यं साम गीयते ।।१।।

निषेधः श्रायमयापार्श्वमिन्द्रामहीकर्चाः ।।२।।

श्रायन्त इव– (१३१६) इत्यस्यामृचि श्रायन्तइवा२३सूरियाम् (ऊ. ए. ३६६) इति निषेधः, अया रुचा– (सा. १५६०) इत्यस्याम् अया । रुचाहरा२३१उवा२२३इ (ऊ. ए ३६७) इति गायत्रपार्श्वम् इन्द्रायेन्दो (सा. १०७६) इत्यस्याम् इन्द्राया२३इन्दोमरुत्वताइ (ऊ. ए. ३६८) इत्यामहीयवम्, चेति त्रीण्येकर्चानि सामानि गीयन्ते ।।२।।

पवस्व म लेयं तृचे ।।३।।

पवस्व मधुमत्तमः– (सा. ६६२–३) इति ऋचोः पवस्वा२३मधुमत्तमाः (ऊ. ए. ३६६) इति कालेयं साम भवति ।।३।।

त्वे सो यौधादैर्घे ।।४।।

त्वे सोम प्रथमा– (सा १५०६–८) इति तृचे तुवो२३१। सो२३म (ऊ ए. ४००) इति यौधाजयम्, त्वेसोमप्रथमावृदोहावृगोहाओहा२३ए (ऊ. ए. ४०१) इति दैर्घश्रवसं चेति सामद्वयं गीयते ।।४।।

अधा द्यौतानम् ॥५॥

अघा होन्द्र– (सा. ७१०–२) इति तृचे **हाऽ३ । ओऽ३हाऽ३ (द्विः)। हाउ । आधाही-याऽ२३** (ऊ. ए. ४०२) इति **द्यौतानं** नाम साम भवति ॥५॥

एन्दु मारुतम् ॥६॥

एन्दुमिन्द्राय– (सा. १५०६–११) इति तृचे **एऽ५न्दुमि । द्राऽ३याऽ३सिञ्चता** (ऊ. ए ४०३) इति **मारुतं** साम गीयते ॥६ ॥

स्वादि जरा ॥७॥

स्वादिष्ठया– (सा. ६८६–६१) इति तृचे **स्वादिष्ठयोवा** (ऊ.ए. ४०४) इति **जराबोधीयं** साम भवति ॥७॥

नदं वः श्रुध्यम् ॥८॥

नदं वः– (सा. १५१२) इत्यस्यामृचि **नदंओऽ२द । तीनोवा** (ऊ. ए. ४०५) इति **श्रुध्यं** साम गीयते ॥८॥

देवो दर्शि ज्ञीयम् ॥९॥

देवो वः– (सा. १५१३–४) इति ऋचोर्गीयमानं **देवोऽ५वः** (ऊ. ए. ४०६) इति साम. तद्देव **अदर्शि गातुवित्** (सा. १५१५–७) इति तृचे गीयमानम् **अदाऽ५र्शि** (ऊ.ए. ४०७) इति च साम **यज्ञायज्ञीयमि**त्युच्यते ॥६॥

उत्तो मही ॥१०॥

उत्ते बृहन्तो– (सा. १५४१–३) इति तृचे **उत्तेबृऽ३हन्तोअर्चयः** (ऊ. ए. ४०८) इत्या**महीयवं** नाम साम भवति ॥१०॥

मन्द्र जरा ॥११॥

मन्द्रꣳहोतारम्– (सा. १५४३) इत्यस्यामृचि **मन्द्रꣳहोतावा** (ऊ. ए. ४०९) इति **जराबोधीयं** साम गीयते ॥११॥

पाहि रवं तृचे ॥१२॥

पाहि नो अग्न– (सा. १५४४–५) इति ऋचोरध्यूढं **पहिनोअग्नाऽ३आइकाऽ२३४या** (ऊ. ए. ४१०) इति साम **रौरवमिति** कथ्यते ॥१२॥

कर्चे दैर्घम् ।।१३।।

पाहि नो अग्न- (सा. १५४४) इत्यस्यामृचि **पाहिनोअग्नएकयाओहाओहाऽ३ए** (ऊ. ए) ४११) इति **दैर्घश्रवसं** नाम साम गीयते ।।१३।।

विश्वस्मात्समन्तम् ।।१४।।

पाहि विश्वस्मात्- (सा १५४५) इत्यस्यामृचि **पाहिविश्वस्माद्रक्षसाः** (ऊ. ए. ४१२) इति **समन्तसंज्ञं** साम भवति ।।१४।।

तास्वेव जयम् ।।१५।।

तास्वेव पाहिनो अग्न-(सा ५४४-५) इत्येतास्वेव स्तोत्रियासु **पाहाऽ३१३। नोऽ३आग्ने** (ऊ. ए. ४१३) इति **यौधाजयमिति** साम गीयते ।।१५।।

इन औशने ।।१६।। द्वितीयः ।।२।।

इनो राजन्- (सा. १५४६-८) इति तृचेऽधिष्ठितम् **आइनाः। राजन्नरताइः** (ऊ ए ४१४) इति यद् गानं **तदौशनमि**त्युच्यते ।।१६।।

अयं द्वितीयो विंशः ।।

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगान एकाहपर्वणि एकविंशः खण्डः ।।१६।।

[ऊहगान एकाहपर्वणि द्वाविंशः खण्डः]

कया ते देव्यम् ।।१।।

कया ते अग्ने-(सा. १५४९-५१) इति तृचे **काऽ५या। ते आऽ३ग्नेऽ३ अङ्गिराः** (ऊ. ए. ४१५) इति **वामदेव्यमिति** विदितं साम गीयते ।।१।।

अग्न आया धसम् ।।२।।

अग्न आ याहि- (सा. १५५२-३) इति ऋचोर्गीयमानम् **आऽ२३४ग्नआयाहिय। ग्नाऽ३भाइः** (ऊ. ए. ४१६) इति साम **नौधस**मित्युच्यते ।।२।।

अच्छ लेयम् ।।३।।

अच्छा नः– (सा. १५५४–५) इति ऋचोरच्छाना ऽ३ःशीरशोचिषाम् (ऊ. ए. ४१७) इति **कालेयं** साम गीयते ।।३।।

अदा संिहतम् ।।४।।

अदाभ्य४पुर एता– (सा. १५५६–८) इति तृचे **अदाभ्य४पुरः । आऽ२३इता** (ऊ. ए. ४१८) इति **संिहितं** साम गीयते ।।४।।

भद्रोऽग्नेवाजसफष्कले कर्चौ ।।५।।

भद्रो नो अग्नि:– (सा. १५५९) इत्यस्यामृचि **भद्रोनोऽ३अग्नि:** (ऊ. ए. ४१९) इति **सफम्, अग्ने वाजस्य–** (सा. १५६१) इत्यस्यामृचि **अग्नेवाऽ३जस्य** (ऊ. ए. ४२०) इति **पौष्कलं** च सामनी गीयेते ।।५।।

तृचे श्रुध्यम् ।।६।।

अग्ने वाजस्य– (सा. १५६१–६३) इति तृचे **अग्नेवाजाऽ२स्य** (ऊ. ए. ४२१) इति **श्रुध्यमिति** साम गीयते ।।६।।

विशो वाश्वमृचि ।।७।।

विशोविशो वो– (सा. १५६४) इत्यस्यामृचि **विशोऽ३१ ।वाऽ३इशो** (ऊ. ए. ४२२) इति **श्यावाश्वसंज्ञं** साम भवति ।।७।।

तृचे न्धीगवज्ञीये ।।८।।

विशोविशो वो अतिथिम्– (सा. १५६४–६) इति तृचे **विशोविशोवोऽ१अताइथाइम्** (ऊ. ए. ४२३) इत्यान्धीगवम्, **विशोऽ५वि** (ऊ. ए. ४२४) इति **यज्ञायज्ञीयं** चेति सामद्वयं गीयते ।।८।।

समिध्दं ज्ञीयकावे ।।९।।

समिद्धमग्निंसमिधा– (सा. १५६७–९) इति तृचे **समाऽ५इद्धम्** (ऊ. ए. ४२५) इति **यज्ञायज्ञीयम्, समोवा । धमग्निंसमिधा** (ऊ. ए. ४२६) इति **कावं** चेति द्वे सामनी गीयेते ।।९।।

उप त्वा वारम् ।।१०।।

उपं त्वा जामयः– (सा. १५७०–२) इति तृचे **उपत्वाजाऔहोहाइ** (ऊ. ए. ४२७) इति **वारवन्तीयाभिधं** साम भवति ।।१०।।

उच्चेषन्तोक जरा ।।११।।

उच्चा ते जातम्– (सा. ६७२–४) इति तृचे **उच्चातेजोवा** (ऊ. ए. ४२८) इति, **इषं तोकाय** (सा. ६६६) इत्यस्यामृचि **इषन्तोकोवा** (ऊ. ए. ४२६) इति च **जराबोधीयनाम्नी** सामनी भवतः ।।११।।

स्वासु वषट् ।।१२।।

स्वासु प्रकृतिषु **अभि त्वा पूर्वपीतये**– (सा. १५७३–४) इति ऋचोर**भित्वापूर्वपीतये** (ऊ. ए. ४३०) इति **वषट्कारणिधनं** नाम साम भवति ।।१२।।

प्रसो तृचे गौङ्गवम् ।।१३।।

प्र सोम देववीतये– (सा. ७६७–८) इति **तृचे** तिसृषु स्तोत्रीयासु **प्रसोमाऽ३देववीतयाइ** (ऊ. ए. ४३१) इति **गौङ्गवाख्यं** साम गीयते ।।१३।।

शग्ध्यू हार ।।१४।।

शग्ध्यूऽ३षु– (सा. १५७६–८०) इति ऋचोः **शग्ध्यूष्वौहोऽ२इशचीपताइ** (ऊ. ए.४३२) इति **हारायणाभिधं** साम भवति ।।१४।।

त्वं कौलमलम् ।।१५।।

त्वँ**ह्ये हि** (सा. १५८१–२) इति ऋचोर्गीयमानं **तुवाऽ३**ँ**होऽ३एहिचेरवाइ** (ऊ. ए. ४३३) इति साम **कौलमलबर्हिष**मित्यभिधीयते ।।१५।।

आशु मदच्युतः कर्चे ।।१६।। तृतीयः ।।३।।

प्र सोमासो मदच्युतः– (सा. ७६६) इत्यस्यामृचि **प्रसोमासोम** (ऊ. ए. ४३४) इति **आशुभार्गवं** साम गीयते ।।१६।।

अयं **तृतीयो** विंशः ।।

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगान एकाहपर्वणि द्वाविंशः खण्डः ।।२२।।

[ऊहगान एकाहपर्वणि त्रयोविंशः खण्डः]

प्रध सत्रा प्रसुवाश्वं कर्चौ ।।१।।

प्र धन्वा सोम– (सा. ५६७) इत्यस्यामृचि **प्रधा॒३४। न्वासोमजागृविः** (ऊ. ए. ४३५) इति **सत्रासाहीयम्, प्र सुन्वानाय** (सा. १३८६) इत्यस्यामृचि **प्रसू॒३१। न्वा॒३ना** (ऊ. ए. ४३६) इति **श्यावाश्वं** चेति सामनी गीयेते ।।१।।

औदलं तृचे ।।२।।

प्र सुन्वानाय (सा. १३८६–८) इति तृचे **प्रसुन्वाना** (ऊ. ए. ४३७) इत्यौ**दलं** साम भवति ।।२।।

प्र दै ज्ञीयम् ।।३।।

प्र दैवोदासो अग्निर्– (सा. १५१७, १५१६ & १५१५) इत्यासु तिसृषु ऋक्षूत्क्रमेण पठितासु **प्रदे॒५व:। दा॒३सो॒३आग्नाइ:** (ऊ. ए. ४३८) इति **यज्ञायज्ञीयं** साम भवति । अस्य च साम्न आधारभूतस्य तृचस्य ऋचामुत्तमायाः प्रथमात्वेन प्रथमायाश्चोत्तमात्वेन क्रियते तु पाठः । मध्यमा परं यथास्थानं तिष्ठति । एवं वक्रगत्या गीयमानत्वादस्य साम्नो **वक्रयज्ञायज्ञीया**मिति च वर्तते वैदिको व्यपदेशः ।।३।।

स्वासु दैर्घम् ।।४।।

यो विश्वा दयते– (सा.१५८३–४) इति ऋचोः **स्वासु** योनिषु **यो विश्वादयतेवस्वो-हाओहा॒ए** (ऊ. ए. ४३९) इति **दैर्घश्रवसं** नाम साम गीयते ।।४।।

शग्ध्यू वर्तः ।।५।।

शग्ध्यू॒३षु–(सा. १५७९–८०) इति ऋचोर्गीयमानं **शग्धा॒३ऊ॒३षुशचीपतोवा** (ऊ. ए. ४४०) इत्य**भीवर्तसंज्ञं साम भवति** ।।५।।

स्वादि ष्कृतम् ।।६।।

स्वादिष्ठया– (सा. ६८९–९१) इति तृचे **स्वाष्ठियामदाहाउष्ठाया** (ऊ. ए. ४४१) इति **हाविष्कृता**भिधं साम गीयते ।।६।।

अस्य ष्मतम् ।।७।।

अस्य प्रत्नाम्– (सा. ७५५–७) इति तृचे **हावस्यप्रत्नामनुद्युत॑हाउ** (ऊ. ए. ४४२) इति यत् साम गीयते तदुच्यते **हाविष्मता**मिति ।।७।।

यस्ते हितम् ।।८।।

यस्ते मदो– (सा. ८१५–७) इति तृचे **यस्तेमदेव** (ऊ. ए. ४४३) इति **सꣳहिताख्यं** साम गीयते ।।८।।

अयं पू वाश्वम् ।।९।।

अयं पूषा– (सा. ८१८–७०) इति तृचे **अयाऽ३१म् । पूऽ३षा** (ऊ. ए. ४४४) इति **श्यावाश्वसंज्ञं** साम भवति ।।९।।

विपश्चितो भार्गवम् ।।१०।।

प्र सोमासो विपश्चितो– (सा. ७६४–५) इति तृचे **प्रसोमासोवि** (ऊ. ए. ४४५) इति **आशुभार्गवनाम** साम गीयते ।।१०।।

स्वासु यौक्तस्रुचम् ।।११।।

स्वासु योनिषु **इन्द्रमिद्देवतातये–** (सा. १५८७–८) इति ऋचोर्गीयमानम् **इन्द्रमिद्देवता । तयाइ** (ऊ. ए. ४४६) इति साम **यौक्तस्रुच**मिति नाम्ना ज्ञायते ।।११।।

प्र सुन्वा गौतमं तृचे ।।१२।।

प्र सुन्वानाय– (सा. १३८६–८) इति **तृचे**ऽध्यूढं **प्रसुन्वानायअन्धसाः** (ऊ. ए. ४४७) इति साम **गौतम**मिति निगद्यते ।।१२।।

वृषाजिगस्वारपर्णे ।।१३।।

वृषा पवस्व धारया– (सा.८०३–५) इति तृचे **वृषापवा** (ऊ. ए. ४४८) **इत्याजिगम्, वृषापवस्वधारयाऽ३या** (ऊ. ए. ४४९) इति **स्वारसौवर्णं** चेति सामद्वयं गीयते ।।१३।।

पुना दैर्घम् ।।१४।।

पुनानः सोम– (सा. ६७५–६) इति ऋचोर्गीयमानम् **पुनानस्सोमधारया ओहाऽ३ए** (ऊ. ए. ४५०) इति यत्साम तदभिधीयते **दैर्घश्रवस**मिति ।।१४।।

यस्ते सुरूपोत्तरम् ।।१५।।

यस्ते मदो– (सा. ८१५–७) इति तृचे **यस्तेमदौहोऽ२ । इया** (ऊ. ए. ४५१) इति **सुरूपोत्तरं** साम गीयते ।।१५।।

त्वꣳहि शङ्कु ।।१६।।

त्वꣳह्या३ङ्ग– (सा. ६३८–९) इति ऋचोरध्यूढं **तुवꣳहिया । ए३२** (ऊ. ए. ४५२) इति यत्साम तत् **शङ्कु**नाम्ना प्रथितं भवति ।।१६।।

सुज्ञा पवस्व देवासितमयं पूषेति ।।१७।। चतुर्थः।।४।।

पवस्व देव वीतये– (सा. १३२६–८) इति तृचे **पवस्वदा । वपीतयाइ** (ऊ. ए. ४५३) इति **सुज्ञानम्, अयं पूषा–** (सा. ८१८–२०) इति तृचे **अयंपूषारयाइः** (ऊ. ए. ४५४) इति **आसिताद्यं** चेति सामनी गीयेते ।।१७।।

अयं **चतुर्थो** विंशः

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगान एकाहपर्वणि त्रयोविंशः खण्डः ।।२३।।

--◇--

[ऊहगान एकाहपर्वणि चतुर्विंशः खण्डः]

उच्चा ऋषभसूक्ते ।।१।।

उच्चा ते जातम् – (सा. ६७२–४) इति तृचे **हाहाउच्चातेजा** (ऊ. ए. ४५५) इति **ऋषभःपवमानः, उच्चातेजातमौ । हौ–**(ऊ. ए. ४५६) इति **गौषूक्तं** चेति सामद्वयं **गीयते** ।।१।।

अभि सोमोत्सेधः ।।२।।

अभि सोमासः– (सा. ८५६–७) इति ऋचोर्गीतम् **अभिसोमासआयवः । पव** (ऊ. ए. ४५७) इत्यु**त्सेध**संज्ञं साम भवति ।।२।।

स्वानो वारम् ।।३।।

परि स्वानो गिरिष्ठाः– (सा. १०९३–५) इति तृचे **परिसुवाऔहोहाइ** (ऊ. ए. ४५८) इति **वारवन्तीयं** साम भवति ।।३।।

प्राणा श्रुध्यम् ।।४।।

प्राणा शिशुर्महीनाम्– (सा. १०१३)–५) इति तृचे **प्राणाशिशूऽ२र्म । हीनोवा** (ऊ. ए. ४५९) इति **श्रुध्यं** साम गीयते ।।४।।

पुरो निषेधः ॥५॥

पुरोजिती वो– (सा. ६९७–९) इति तृचे **पुरोजितीवोऽ३अन्धसाः** (ऊ. ए. ४६०) इति **निषेधाख्यं** साम भवति ॥५॥

प्र धन्व वर्यः ॥६॥

परि प्र धन्व– (सा. १३६७–९) इति तृचे **परिप्रधा। न्वाऽ२ईऽ२३४न्द्रा** (ऊ. ए. ४६१) इति **वाजदावर्यो** नाम साम गीयते ॥६॥

जिघ्न महो ॥७॥

पवमानस्य जिघ्नतः– (सा. १३१०–२ इति तृचे **पवमा३नस्यजिघ्नताः** (ऊ. ए. ४६२) इत्**यामहीयवं** साम भवति ॥७॥

साकं पार्थम् ॥८॥

साकमुक्षो– (सा. १४१८–२०) इति तृचे ओऽ३होऽ३होइ **। साकमुक्षो** (ऊ. ए. ४६३) इति यद् गीयते तत् **पार्थसंज्ञितं** भवति ॥८॥

इमा उ त्वा श्यैतम् ॥९॥

इमा उ त्वा– (सा. १६०७–८) इति ऋचोरिमाउत्वापुरू **। वसाऽ३४ओहोवा** (ऊ. ए. ४६४) इति **श्यैतं** नाम साम गीयते ॥९॥

यस्य लेयम्॥१०॥

यस्यायं विश्व– (सा. १६०९–१०) इति ऋचोर्गीतम् **यस्यायाऽ३म् विश्वाअर्याः** (ऊ. ए. ४६५) **इति** साम **कालेयमिति** कथ्यते ॥१०॥

पवमा सꣳहितम् ॥११॥

पवमानो अजीजनत्– (सा. ८८९–९१) इति तृचेऽध्यूढं **पवमानोअ। जाऽ२इजनात्** (ऊ. ए. ४६६) **इतीदं** साम **सꣳहित**मिति ब्रूयते ॥११॥

आसो-गोमघ्नः सफश्रुध्ये ॥१२॥

आ सोता परि– (सा. १३९४–५) इति ऋचोरासोताऽ३परि (ऊ. ए. ४६७) इति **सफम्, गोमघ्न इन्दो** –(सा. १६११–३) इति तृचे **गोमघ्नाऽ२इन्दो** (ऊ. ए. ४६८) इति **श्रुध्यं** चेति सामनी गीयेते ॥१२॥

अभी नो श्यावागवे ॥१३॥

अभी नो वाजसातमम्– (सा. १२३८–४०) इति तृचे **अभाऽ३१इ । नोऽ२वा** (ऊ. ए. ४६९) इति **श्यावाश्वम्, अभिनोवाजसाऽ१तामाम्** (ऊ. ए. ४७०) **इत्यान्धीगवं** चेति सामद्वयं गीयते ॥१३॥

अञ्जते कावम् ॥१४॥

अञ्जते व्यञ्जते– (सा. १६१४–६) इति तृचे **अञ्जोवा । ताइवियञ्जताइ** (ऊ. ए. ४७१) इति **कावसंज्ञं** साम भवति ॥१४॥

तोषि दꣳष्ट्रोत्तरम् ॥१४॥

परीतो षिञ्चता- (सा. १३१३– ४) इति ऋचोर्गीतं **परीतोषिञ्चतासुतमैंयादौ** (ऊ. ए. ४७२) इतीदं सामाष्टादꣳष्ट्रोत्तरमिति कथ्यते ॥१५॥

अभि त्वा कण्वरम् ॥१६॥

अभि त्वा शूर-- (सा ३८०–१) इति ऋचोर**भित्वाशूरनोनुमाः** (ऊ. ए. ४७३) इति **कण्वरथन्तरं साम** भवति ॥१६॥

आ नो दोविशीयम् ॥१७॥ पञ्चमः ॥५॥

आ नो विश्वासु– (सा. १४९२–३) इति ऋचोर्गीतम् **आनोविश्वासुहव्यमोहा । ओहाऽ३ए** (ऊ. ए. ४७४) इतीदं साम **सदोविशीयमि**ति कथ्यते ॥१७॥

अयं **पञ्चमो** विंशः

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगान एकाहपर्वणि चतुर्विंशः खण्डः ॥२४॥

–◆–

[ऊहगाने एकाहपर्वणि पञ्चविंशः खण्डः]

परित्यꣳश्यावागवे ॥१॥

परि त्य ꣳ हयतम् –(सा. २३२९–३१) इति तृचे **पराऽ३१इ । त्याऽ३ꣳह** (ऊ. ए. ४७५) इति **श्यावाश्वम्, परित्यꣳहयंताऽ१ꣳहाराइम्** (ऊ. ए. ४७६) **इत्यान्धीगवं** चेति द्वे सामनी गीयेते ॥१॥

पवित्रं कावम् ।।२।।

पवित्रं ते– (सा. ८७५–७) इति तृचे **पवोवा । त्रन्तोविततंम्रा** (ऊ. ए. ४७७) इति यद् गान गीयते **तत्कावमित्युच्यते** ।।२।।

स्वादि मौक्षम् ।।३।।

स्वादिष्ठया– (सा. ६८६–६१) इति तृचे **स्वादिष्ठयामदिष्ठया । औहोवा** (ऊ. ए. ४७८) इति **दक्षणिधनमौक्षं** नाम साम भवति ।।७।।

ज्ञीयर्क्षु विशीयम् ।।४।।

यज्ञा यज्ञा वो–(सा. ७०३–४) इति **ऋचोर्यज्ञायज्ञाहुम्स्थीवोऽ३अग्नयाइ** (ऊ. ए. ४७६) इति **विशोविशीयाभिधं** साम भवति ।।४।।

त्वन्नश्चि वारम् ।।५।।

त्वन्नश्चित्रः– (सा. १६२३–४) इति ऋचोस्तु**वन्नश्चाऔहोहाइ** (ऊ.ए. ४८०) इति **वारवन्तीयं** साम गीयते ।।५।।

उच्चा स्वारसैन्धुक्षितम् ।।६।।

उच्चा ते– (सा. ६७२–४) इति तृचे **उच्चातेजातमन्धसाः** (ऊ. ए. ४८१) इति **स्वारसैन्धुक्षितं** साम भवति ।।६।।

तोषिं वरुणसाम ।।७।।

परीतो षिञ्चता– (सा. १३१३–४.) इति ऋचोर्गीतं **परीतोषिञ्चतासुतोवा । ओवा** (ऊ. ए. ४८२) इति यत् साम तद् **वरुणसामे**त्युचते ।।७।।

यस्ते काक्षी ।।८।।

यस्ते मदो– (सा. ८१५–७) इति तृचे **यस्तेमाऽ३दोवरेणियाः** (ऊ. ए. ४८३) इति **काक्षीवतं** नाम साम गीयते ।।८।।

अच्छ दासम् ।।९।।

इन्द्रमच्छ– (सा. ६९४–६) इति तृचे **इन्द्राऽ३१म् । अच्छाऽ३१२३४** (ऊ. ए. ४८४) इति **दैवोदास**नामकं साम भवति ।।६।।

पुरो वाध्यूवैतहव्यसोमसामत्रासानि ॥१०॥

पुरोजिती वो अन्धस– (सा. ६९७–९) इति तृचे **पुरा४पुरा:** (ऊ. ए. ४८५) इत्यानूपवाध्यूश्वम्, **पू५रोजि** (ऊ. ए. ४८६) इति **वैतहव्यमोकोनिधनम्**, **पुरोजिता ऽ२इवोअन्धसा:** (ऊ. ए. ४८७) इति **सोमसाम, पूऽ२३४। र: । जिताइ** (ऊ. ए. ४८८) **त्रासदस्यवं** चेति चत्वारि सामानि गीयन्ते ॥१०॥

अग्ने त्वॐसत्रा ॥११॥

अग्ने त्वन्नो– (सा. ११०७–९) इति तृचे **अग्नाऽ३इ४ । त्वन्नोअन्तम:** (ऊ. ए. ४८९) इति **सत्रासाहीयं** साम भवति ॥११॥

अभि सो दोविशीयम् ॥१२॥

अभि सोमास आयव:– (सा. ८५६–७) इति **ऋचोरभिसोमासआयवओहाओहाऽ३ए** (ऊ. ए. ४९०) इति **सदोविशीयाख्यं** साम गीयते ॥१२॥

स्वासु वारम् ॥१३॥

अश्वं न त्वा– (१६३४–६) इति तृचे **स्वासु** प्रकृतिषु **अश्वन्नत्वाऔहोहाइ** (ऊ. ए. ४९१) इति **वारवन्तीयं** साम भवति ॥१३॥

प्रतूर्तिषु वर्त: ॥१४॥

त्वमिन्द्र प्रतूर्तिषु– (सा. १६३७–८) इति **ऋचोस्तुवाऽ३माऽ३इन्द्रप्रतूर्तिष्वोवा** (ऊ. ए. ४९२) इत्य**भीवर्तसंज्ञं** साम भवति ॥१४॥

प्रत्नामृषभ: ॥१५॥

अस्य प्रत्नाम्– (सा. ७५५–७) इति तृचे **हाहावस्यप्रत्नाम्** (ऊ. ए. ४९३) इति **ऋषभ४पवमानाभिधं** साम गीयते ॥१५॥

तोष्युत्सेधे ॥१६॥ षष्ठ: ॥६॥

परीतो षिञ्चता– (सा. १३१३–४) इति ऋचो: **परीतोषिञ्चतासुतम् । सोम:** (ऊ. ए. ४९४) इत्**युत्सेधसंज्ञं** साम गीयते ॥१६॥

अयं **षष्ठो**ऽविंश: ॥

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगान एकाहपर्वणि पञ्चविंश: खण्ड: ॥२५॥

--◇--

[ऊहगान एकाहपर्वणि षड्विंशः खण्डः]

उत्सेध एव श्रीणम् ।।१।।

श्रीणन्तो गोभिरुत्तरम्– (सा. १३१४d–५) इति सपादर्चि **श्रीणन्तोगोभिरुत्तरम् । श्रीण ।** (ऊ. ए. ४९५) इत्यप्युत्सेधसंज्ञमेव साम भवति ।।१।।

अच्छ विशीयम् ।।२।।

इन्द्रमच्छ– (सा. ६९४–६) इति तृचे गीतम् **इन्द्रमच्छहुम्स्थिसूऽ३तइ माइ** (ऊ. ए. ४९६) इतीदं साम **विशोविशीयमित्युच्यते** ।।२।।

अयं पू निषेधः ।।३।।

अयं पूषा– (सा. ८१८–२०) इति तृचे **अयंपूषाराऽ३यिर्भगाः** (ऊ. ए. ४९७) इति निषेधसंज्ञं साम भवति ।।३।।

इन्दुः पुष्पम् ।।४।।

इन्दुरश्वो न कृत्व्यः– (सा. ६९८d–९) इति सपादर्चि तृतीयस्तोत्रीयायां **इन्दुरश्वोन-कृत्वियः** (ऊ. ए. ४९८) **इत्यर्कपुष्पाभिधं** साम गीयते ।।४।।

च्यावनमेकस्यां पवस्व ।।५।।

पवस्व **मधुमत्तमः**– (सा. ६९२–३) इत्ये**कस्यामृचिपवाऽ२३४स्वम । धुमाऽ२३४त्तमाऽ६:** (ऊ. ए ४९९) इति **च्यावनं** नाम साम गीयते ।।५।।

तं वः पुरो जनित्रे ।।६।।

तं वो दस्मम्– (सा. ६८५–६) इति ऋचो**स्तम्वोदाऽ३स्ममृतीषहाम्** (ऊ. ए. ५००) इति **जनित्राद्यम्, पुरोजिती वो**– (सा. ६८७–९) इति तृचे **पुरोजितीवोअ । धसाऽ३:** (ऊ. ए. ५०१) इति **जनित्रोत्तरं** चेति द्वे सामनी गीयेते ।।६।।

पुना तिथम् ।।७।।

पुनानः सोम–(सा. ६७५–६) इति ऋचोर्गीतं **पुनानस्सोहाइ** (ऊ. ए. ५०२) इति यत्साम विद्यते **तन्मैधातिथमिति** निगद्यते ।।७।।

तं वः शुद्धापदान्तम् ॥८॥

तं वो दस्मम्– (सा. ६८५–६) इति ऋचोस्तंवोदस्ममृतीषहाम् (ऊ. ए. ५०३) इति **पदनिधनशुद्धाशुद्धीयं (पदान्तशुद्धाशुद्धीयं** वा) साम गीयते ॥८॥

स्वादिमच्छगौषूक्ताश्वसूक्त एकचर्चौ ॥९॥

स्वादिष्ठया- (सा. ६८६) इत्यस्यामृचि **स्वादिष्ठयामदौ । हौहोवाहाइ** (ऊ. ए. ५०४) इति **गौषूक्तम्, इन्द्रमच्छ**– (सा. ६९४) इत्यस्याम् **आऔहोवाहाइ । इन्द्रमच्छा** (ऊ. ए ५०५) **इत्याश्वसूक्तं** चेति सामनी गीयेते ॥९॥

यज्ञेह्यूषु तन्तेश्रुधीति च वाराणि ॥१०॥

यज्ञायज्ञा वो– (सा. ७०३–४) इति ऋचोर्यज्ञायज्ञाऔहोहाइ । (ऊ. ए. ५०६) इति, **एह्यूषु ब्रवाणि**– (सा. ७०५–७) इति तृचे **एहियूषाऔहोहाइ** (ऊ.ए. ५०७) इति, **तं ते मदम्**– (सा. ८०८–२) इति **तन्तेमदाऔहोहाइ** (ऊ. ए. ५०८) इति, **श्रुधी हवम्**– (सा. ८८३–५) इति तृचे **श्रुधीहवाऔहोहाइ** (ऊ. ए. ५०९) इति च भवन्ति **चत्वारि वारवन्तीयानि** । इमानि **वारवन्तीयोत्तराणी**त्यपि कथ्यन्ते ॥१०॥

पिबोत्सेधनिषेधौ ॥११॥

पिबा सुतस्य रसिनो– (१४२१–१) इति ऋचोः **पिबासुतस्यरसिनः** (ऊ. ए. ५१०) इत्युत्सेधसंज्ञम्, **पिबासुतस्य३२रसिनाः** (ऊ. ए. ५११) इति **निषेधसंज्ञं** चेति द्वे सामनी गीयेते ॥११॥

उच्चा पर्णमैडम् ॥१२॥

उच्चा ते- (सा. ६७२–४) इति तृचे गीतम् **उच्चातेजोवा** (ऊ. ए. ५१२) इतीदं सामैडं-**सौपर्ण**मित्युच्यते ॥१२॥

दुहा समन्तं पङ्क्त्याम् ॥१३॥

दुहान ऊधर्दिव्यम्– सा. ६७७) इत्यस्यामृचि **दुहानऊधर्दिवियाम्** (ऊ.ए. ५१३) इति **समन्तसंज्ञं** साम गीयते ॥१३॥

पुना वरुणसाम्नि ।।१४।। सप्तमः ।।७।।

पुनानः सोम– (सा. ६७५–६) इति ऋचोर्गीतं **पुनानस्सोमधारयोवा । ओवा** (ऊ. ए. ५१४) इतीदं साम **वरुणसामेति** कथ्यते ।।१४।।

अयं **सप्तमो** विशः ।।

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगान एकाहपर्वणि षड्विंशः खण्डः ।।२६।।

[ऊहगान एकाहपर्वणि सप्तविंशः खण्डः]

तवाहं मन्तजये ।।१।।

तवाहꣳसोम रारण– (सा. ६२२–४) इति ऋचोस्**तवाहꣳसोमरारण** (ऊ. ए. ५१५) इति **समन्तम्, तवा ऽ३१।हा ऽ३ꣳसो । म** (ऊ. ए. ५१६) इति **यौधाजयं** चेति **सामद्वयं** गीयते ।।१।।

रेवतीर्दव्यम् ।।२।।

रेवतीर्नः– (सा.१०८४–६) इति तृचे **रेऽ५व । तीर्ना ऽ३स्सा ऽ३ध** (ऊ. ए. ५१७) इति **वामदेव्यसंज्ञं** साम गीयते ।।२।।

स्वासु सत्रा ।३।।

त्यमु बः– (सा. १६४२–४) इति तृचे **स्वासु** प्रकृतिषु **त्या ऽ३४म् । उवस्सत्रासाहम्** (ऊ. ए. ५१८) इति **सत्रासाहीयाख्यं** साम भवति ।।३।।

भरं तव त्यत् ।।४।।

तव त्यदिन्द्रियम्– (सा. १६७५–७) इति तृचे **तवा ऽ३त्या ऽ३दिन्द्रियम्बृहोवा** (ऊ. ए. ५१९) इति **सौभराभिधं** साम भवति ।।४।।

पुरो जागतꣳसोमसाम यदभित्यमिति ।।५।।

अभि त्यं मेषम्– (सा. ३७६) इत्यस्यामृचि ग्रामेगेये यद् **जागतꣳसोमसाम** (**वैखानꣳसोमसाम** वा) वर्तते तदेवात्र **पुरोजिती वो**– (सा. ६९७–९) इति तृचे **पुरोजा ऽ३ इतीवोअन्धसाः** (ऊ. ए. ५२०) इत्येवंरूपेण गीयते ।।५।।

प्रत्नं महो ।।६।।

प्रत्नं पीयूषम्– (सा. १४६४ab) इति ऋग्भागे **प्रत्नंपीऽ३यूषंपूर्वियाम्** (ऊ. ए.५२१) इत्यामहीयवं साम भवति ।।६।।

इन्द्रं पर्णमैडम् ।।७।।

इन्द्रमभि– (सा. १४६४c–५a) इति पादद्वय **इन्द्रमभीवा** (ऊ. ए. ५.२२) **इत्यैड**-सौपर्णमिति साम गीयते ।।७।।

वसुरुचः सत्रा ।।८।।

वसुरुचो दिव्याः– (सा. १४६५bc) इति पादद्वये **वसूऽ३४ । रुचोदिव्याअ । भोऽ६वा** (ऊ. ए. ५२३) इति **सत्रासाहोयं** साम भवति ।।।८।।

अध यदोविशीयम् ।।९।।

अध **यदिमे**– (सा. १४६६) इत्यस्यामृचि **अधयदिमेपवमाओहाओहाऽ३ए** **(ऊ. ए. ५२४)** इति गीयमानं यत् साम तत्**सदोविशीय**मिति कथ्यते ।।६।।

प्रत्नमुत्सेधः ।।१०।।

प्रत्नं **पीयूषम्**– (सा. १४६४–६) इति तृचे **प्रत्नंपीयूषंपूर्व्यंयदु** (ऊ. ए. ५२५) इत्युत्सेधसंज्ञ साम भवति ।।१०।।

तदिदा श्यैतम् ।।११।।

तदिदास– **(सा १४८३–५)** इति तृचे **तदिदासभुव** (ऊ. ए. ५२६) इति **श्यैतं नाम** साम गीयते ।।११।।

रक्षः सुरूपोत्तरम् ।।१२।।

रक्षोहा **विश्वचर्षणिर्**– (सा. ६६०) इत्यस्यामृचि **रक्षोहावौहोऽ२ । इया** (ऊ. ए. ५२७) इति यत्साम भवति तत्**सुरूपोत्तर**मित्युच्यते ।।१२।।

सुमन्मा वारम् ।।१३।।

सुमन्मा वस्वी– (सा. १६५४–६) इति तृचे **साऔहोहाइ । माऽ२३४न्मा** (ऊ. ए.५२८) इति **वारवन्तीयं** साम **गीयते** ।।१३।।

पुना वैयश्वं कर्चः ॥१४॥

पुनानः सोम– (सा. ६७५) इत्यस्य'मृचि गीयमानं **पुनानस्सोमधारया३ए** (ऊ. ए. ५२९) इतीदं साम **वैयश्व**मिति कथ्यते ॥१४॥

वषडन्तमुत्सः ॥१५॥

उत्सो देवो– (सा. ६७५d–६ab) इति पादत्रये मध्यमस्तोत्रीयायां गीयमानं **उत्सो-देवोहिरण्ययः** (ऊ. ए. ५३०) इतीदं साम **वषट्कारणिधन**मित्युच्यते ॥१५॥

यस्ते सत्रा ॥१६॥

यस्ते मदो वरेण्यः– (सा. ८१५–७) इति तृचे **यस्तेऽ२३४मदोवरेणियः** (ऊ. ए. ५३१) इति गीयमानं साम **सत्रासाहीय**मिति कथ्यते ॥१६॥

पवस्व काशीचीनेडम् ॥१७॥ एकाहाः॥३॥

पवस्व मधुमत्तमः– (सा. ६९२–३) इति ऋचोर्गीयमानं **पवस्वमधु । माऽ२त्तमाः** (ऊ. ए. ५३२) इतीदं साम **प्रतीचीनेडंकाशीत**मिति विदितं भवति ॥१७॥

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगान एकाहपर्वणि सप्तविंश: खण्डः ॥२७॥

इति श्री**शेणई**कुलोत्पन्नेन बेल्लिक्कोत्तुग्रामजन्मना जनार्दनशर्मणस्तनूजेन
रामचन्द्रशर्मणा प्रणीतायां साधनाख्यायां पुष्पसूत्रव्याख्यायां
प्रथमे प्रपाठक ऊहगान एकाहपर्व समाप्तम् ॥३॥

इति प्रथमः प्रपाठकः ॥

द्वितीयः प्रपाठकः

ऊहगानेऽहीनपर्व

प्रथमः खण्डः

पन्यं कक्षम् ।।१।।

पन्यंपन्यमित्– (सा. १६५७–९) इति तृचे **पन्यंपन्यमित्सोतारः** (ऊ. अ. ५३३) इति गीयमानं साम **श्रौतकक्षमिति** कथ्यते ।।१।।

आ त्वादꣳष्ट्रं पूर्वम् ।।२।।

आ त्वा विशन्तु– (सा. १६६०–२) इति तृचे **आत्वाविशन्त्विन्दवः** (ऊ. अ. ५३४) इत्याष्टादꣳष्ट्रम्पूर्वमिति साम गीयते ।।२।।

परिस्वा सुरूपोत्तरम् ।।३।।

परि स्वानः– (सा. १०९३–५) इति तृचे **परिसुवौहोऽ२** (ऊ. अ. ५३५) इति **सुरूपोत्तरसंज्ञं** साम भवति ।।३।।

स्वासु हविष–जरा–मार्गीयवानि ।।४।।

परि प्र धन्व– (सा. १३६७–९) इति तृचे **परीऽ३होइ । प्रधाऽ२३४न्वा** (ऊ. अ. ५३६) इति **सौहविषम्** (**स्वर्वन्निधनसौहविषं** वा), **जराबोध–** (सा. १६६३–५) इति तृचे **जराबोधोवा** (ऊ. अ. ५३७) इति **जराबोधीयम्, तद्वो गाय–** (सा. १६६६–८) इति तृचे **तद्वोहोवा** (ऊ. अ. ५३८) इति **मार्गीयवं** चेत्येवं त्रीणि सामानि **स्वासु** स्वस्वप्रकृतिषु गीयन्ते ।।४।।

इदं वारम् ।।५।।

इदं विष्णुर्वि– (सा. १६६९–७१) इति तृचे **इदंविष्णाओहोहाइ** (ऊ. अ. ५३९) इति **वारवन्तीयसंज्ञं** साम भवति ।।५।।

पवस्व साकमृचि ।।६।।

पवस्व मधुमत्तमः– (सा. ६९२) इत्यस्यामृचि **पवस्वमाऽ३। हौऽ३होऽ३१** (ऊ. अ. ५४०) इति **धुरासाकमश्वसंज्ञं** साम भवति ।।६।।

अभिसो–तं वो–जनित्रे ।।७।।

अभि सोमासः– (सा. ८५६–७) इति ऋचोर्गीयमानम् **अभिसोऽ३मासआवयाः** (ऊ. अ. ५४१) इति **जनित्राद्यम्, तं वो दस्मम्–** (सा. ६८५–६) इति ऋचोर्गीयमानं **तंवोदस्म-मृती । षहाऽ३म्** (ऊ. अ. ५४२) इति **जनित्रोत्तरं** चेति सामनी भवतः ।।७।।

अच्छ जरा ।।८।।

इन्द्रमच्छ– (सा. ६९४–६) इति तृच **इन्द्रमच्छोवा** (ऊ. अ. ५४३) इति गीयमानं साम **जराबोधीयमित्युच्यते** ।।८।।

प्रसो जरा–सोमसाम–रोहितकूलीयानि ।।९।।

प्र सोमासो– (सा. ७६४–६) इति तृचे **प्रसोमासोवा । वाइपश्चिताः** (ऊ. अ. ५४४) इति जराबोधीयम्, **प्रसोमासाः** (ऊ. अ. ५४५) इति **सोमसाम, प्रसोमासोवियाः । चिताऽ२ः** (ऊ. अ. ५४६) इति **रोहितकूलीयं** चेति त्रीणि सामानि गीयन्ते ।।९।।

प्र सो क्षारान्तं जयम् ।।१०।।

प्र सोम देववीतये– (सा. ७६७–८) इति ऋचोः **प्रसोऽ३१। माऽ३दे । व** (ऊ.अ. ५४७) इत्याक्षारान्तं **यौधाजयं** नाम साम भवति ।।१०।।

उद्घे स्वारं पर्णम् ।।११।।

उद्घेदभि– (सा. १४५०–२) इति तृचे **उद्घेदभिश्रुतामाऽ३घाम्** (ऊ. अ. ५४८) इति गीयमानं साम **स्वारंसौपर्णमिति** निगद्यते ।।११।।

अच्छाक्षारम् ।।१२।।

इन्द्रमच्छ– (सा. ६९४–६) इति तृचे **इन्द्रम् । अच्छाऽ३४।औहोऽ५सुताइमाइ** (ऊ. अ. ५४९) इति यत् साम गीयते तदाक्षारनाम्ना विदितं भवति ।।१२।।

अभि प्रि खानसम् ।।१३।।

अभि **प्रियाणि–** (सा. ७००–२) इति तृचे **अभि प्रोऽ३याणिपवताइ** (ऊ. अ. ५५०) इति **वैखनसाभिधं** साम भवति ।।१३।।

अस्य प्रत्नाशु–मार्गीयवे ।।१४।। प्रथमः ।।१।।

अस्य प्रत्नाम्– (सा. ७५५–७) इति तृचे **अस्यप्रत्नाम । नुद्यूऽ३ताम्** (ऊ. अ ५५१) इत्याशुभार्गवम्,**अस्यौहोवा** (ऊ. अ. ५५२) इति **मार्गीयवं** चेति सामनी गीयेते ।।१४।।

अयं **प्रथमो** विंशः ।।

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगानेऽहीनपर्वणि प्रथमः खण्डः ।।१।।

-◇-

[ऊहगानेऽहीनपर्वणि द्वितीयः खण्डः]

एतास्वेव मित्र–टत–साक– लम्बानि ।।१।।

एतास्वेव अस्यप्रत्नादिषु ऋक्षु **अस्यप्रत्नामनुद्युताऽ३मे** (ऊ. अ. ५५३) इति **सौमित्रम्, अस्य । एआस्या** (ऊ. अ. ५५४) इत्यैटतम्, **अस्यप्रत्नाऽ३म् । हौऽ३होऽ३१इ** (ऊ. अ. ५५५) इति **धुरासाकमश्वम्, अस्यप्रत्नामनुद्युतम् । ईयइयाहाइ** (ऊ. अ. ५५६) इति **विलम्बसौपर्णं** चेति चत्वारि सामानि गीयन्ते ।।१।।

अभि सो दैर्घम् ।।२।।

अभि सोमासः– (सा. ८५६–७) इति ऋचोरभिसोमास **आयवओहाओहाऽ३ए** (ऊ. अ. ५५७) इति **दैर्घश्रवसमिति** साम भवति ।।२।।

प्र हिन्वा द्विहिंकादेव्यम् ।।३।।

प्र हिन्वानः– (सा.८५७^{d}–८) इति सपादर्चि **प्रहिन्वाऽ२३नऋतंबृहात्** (ऊ. अ. ५५८) इति **द्विहिंकारवामदेव्यसंज्ञं** साम भवति ।।३।।

एवमेव तनिहन्मे ।।४।।

एवमेव पूर्वोक्तरीत्या **अभि सोमासः–** (सा. ८५६–७) इति ऋचोरभीहाइ (ऊ. अ. ५५९) इति **सन्तनि, प्र हिन्वानः–** (सा. ८५७^{d}–८) इति सपादर्चि **प्रहिन्वाऽ३नऋतंबृहात्** (ऊ. अ. ५६०)इति **पौरुहन्मनं** चेति सामनी गीयेते ।।४।।

मो षु त्वा पार्श्वम् ।।५।।

मो षु त्वा (सा. १६७५–६) इति ऋचोः **मोषूः** (ऊ. अ. ५६१) इति **गायत्रपार्श्व**-मिति साम गीयते ।।५।।

अस्ता सन्तनि ।।६।।

अस्तावि मन्म– (सा. १६७७–८) इति ऋचोरस्ताहाइ (ऊ. अ. ५६२) इति **सन्तनि**-संज्ञं साम भवति ।।६।।

यस्ते सुरूपाद्यभासासितानि ।।७।।

यस्ते मदो वरेण्यः– (सा.८१५–७) इति तृचे **यस्तेमदाऽ२ः। इयाऽ२इया** (ऊ. अ. ५६३) इति **सुरूपाद्यम्, यस्ते। माऽ३दो। वा। ईया** (ऊ. अ. ५६४) इति **भासम्, यस्तेमदोवरे। इयाऽ३४३ईऽ३४या** (ऊ. अ. ५६५) इति **वासिष्ठभासितं** चेति त्रीणि सामानि **गीयन्ते** ।।७।।

अभि द्यु वाचः ।।८।।

अभि द्युम्नम्– (सा. १०११–२) इति ऋचोरभिद्युम्नाम्। **होइ** (ऊ. अ. ५६६) इति **वाचस्सामे**ति साम भवति ।।८।।

सखा तृचे शौक्तम् ।।९।।

सखाय आ– (सा. ११५७–९) इति **तृचे सखा। यआओऽ२३४वा** (ऊ. अ. ५६७) इति **शौक्त**मिति साम गीयते ।।९।।

इन्द्रासितकौत्सशुद्धाक्रौश्चरयिष्ठानि ।।१०।। द्वितीयः।।२।।

इन्द्राय सोमपातवे– (सा. १६७९–८१) इति तृचे **इन्द्रायसोमपा। तवाइ** (ऊ. अ. ५६८) इत्यासिताद्यम्, **इन्द्राहीयाऽ२४। सोमपातवईया** (ऊ. अ. ५६९) इत्यैडंकौत्सम्, (**स्वार-कौत्सं** वा), इन्द्रायसोमपातवाइ (ऊ. अ. ५७०) इति **शुद्धाशुद्धीयाद्याम्, (पदनिधनशुद्धाशुद्धीयं** वा), **इन्द्रायसौहो। मापातवाइ** (ऊ. अ. ५७१) इति **क्रौञ्चाद्यम्, इन्द्रायसो। मपाताऽ३वाइ** (ऊ. अ. ५७२) इति **रयिष्ठं** चेति षट् सामानि गीयन्ते ।।१०।।

अयं **द्वितीयो** विशः ।।

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगानेऽहीनपर्वणि द्वितीयः खण्डः ।।२।।

[ऊहगानेऽहीनपर्वणि तृतीयः खण्डः]

इन्द्रा पविन्नीये ।।१।।

इन्द्राय सोम– (सा. १६७९–८१) इति तृचे **इन्द्राऽ५य । तोऽ३माऽ३पातावाइ** (ऊ. अ. ५७३) इति, **पवित्रं ते–** (सा. ८७५–७) इति तृचे **पवाऽ५इत्रम् । ताऽ३इवा** (ऊ. अ. ५७४) इति च **यज्ञायज्ञीय**सामनी गीयेते ।।१।।

स्वासु विशीयम् ।।२।।

विशो विशो वो– (सा. १५६४–६) इति तृचे **स्वासु** प्रकृतिषु **विशोविशोहुम्स्वि-वोऽ३अतिथाइम्** (ऊ. अ. ५७५) इति **विशोविशीय**मिति साम भवति ।।२।।

उच्चा सुरूपोत्तरादारसंक्षाराः ।।३।।

उच्चा ते– (सा. ६७२–४) इति तृचे **उच्चातेजौहोऽ२। इया** (ऊ. अ. ५७६) इति **सुरूपोत्तरम्, हाउच्चातेजा** (ऊ. अ. ५७७) इत्य**दारसृक्, औहोइहवाऽ३होइ। उच्चातेजाऽ३ताऽ३ मन्धसः** (ऊ. अ. ५७८) इती**डानांसंक्षर** इति त्रीणि सामानि गीयन्ते ।।३।।

तोर्षि पृश्नि ।।४।।

परीतो षिञ्चता– (सा. १३१३–४) इति ऋचोः **पराइतोऽ२३षिञ्चतासुत ँहाउ** (ऊ. अ. ५७९) इति पृश्निसंज्ञं साम भवति ।।४।।

तथा श्रीणम् ।।५।।

श्रीणन्तो गोभिरुत्तरम्– (सा.१३१४d–५) इति सपादर्चि **श्रीणन्तोऽ२३गोभिरुत्तर ँहाउ** (ऊ. अ. ५८०) इति च **तथा पृश्नि**संज्ञं भवति ।।५।।

स्वानो हाविष्म–शाम्म–दाव–चीनेड–विष्कृतानि ।।६।।

परि स्वानो–(सा. १०९३–५) इति तृचे **हाउपरिस्वानोगिरिष्ठाहाउ** (ऊ. अ. ५८१) इति **हाविष्मतम्, परिसुवानऐ । हीऐहाऽ३४या** (ऊ. अ. ५८२) इति **शाम्मदम्, परिसुवाऽ२३ नोगिरिष्ठाहाउ** (ऊ. अ. ५८३) इति **दावसुनिधनम्, परिसुवानः । गाऽ२इरिष्ठाः** (ऊ. अ. ५८४) इति **प्रतीचीनेडंकाशीतम्, परिसुवानोगाहाउराइष्ठाः** (ऊ. अ. ५८५) इति **हाविष्कृतं** चेति पञ्च सामानि गीयन्ते ।।६।।

अयं पू ज्ञीयहिष्ठीये ॥७॥

अयं पूषा– (सा. ८१८–२०) इति तृचे **अयाऽ५म्पू । बाऽ३राऽ३यिर्भगाः** (ऊ. अ. ५८६) इति **यज्ञायज्ञीयम्, अयंपूषारयिर्भगः** (ऊ. अ. ५८७) इति **यद्वाहिष्ठीयं** चेति सामनी गीयेते ॥७॥

धर्ता ज्ञीयम् ॥८॥

धर्ता दिवः– (सा. १२२८–३०) इति तृचे **धर्ताऽ५दि । वाऽ३४पाऽ३वतेका** (ऊ. अ. ५८८) इति **यज्ञायज्ञीयं** साम गीयते ॥८॥

प्र सु पारम् ॥९॥

प्र सुन्वानाय– (सा. १३८६–८) इति तृचे **प्रसुन्वाऽ२३नाय** (ऊ. अ. ५८९) इति **आकूपारसंज्ञं** साम भवति ॥९॥

अयं पू क्रौञ्चाद्यम् ॥१०॥

अयं पूषा– (सा. ८१८–२०) इति तृचे **अयंपूषौहो** (ऊ. अ. ५९०) इति **क्रौञ्चाद्याभिधं** साम गीयते ॥१०॥

कस्तं देव्यम् ॥११॥

कस्तमिन्द्र– (स. १६८२–३) इति ऋचोः **काऽ५स्तम्** (ऊ. अ. ५९१) इति **वामदेव्यम्** (महावामदेव्यं वा) इति साम भवति ॥११॥

तिस्रः सैन्धुक्षिते ॥१२॥ तृतीयः ॥३॥

तिस्रो वाचः– (सा. ८६९–७१) इति तृचे **तिस्रोवाचो । हाइ** (ऊ. अ. ५९२) इति सैन्धुक्षिताख्यं साम गीयते ॥१२॥

अयं तृतीयो विंशः ॥

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगानेऽहीनपर्वणि तृतीयः खण्डः ॥३॥

[ऊहगानेऽहीनपर्वणि चतुर्थः खण्डः]

सुता त्वाष्ट्री स्वारे ॥१॥

सुतासो मधुमत्तमः– (सा. ८७२–४) इति तृचे **सुतासोमाऽ३हा** (ऊ. अ. ५६३) इति **स्वारत्वाष्ट्रीसाम, सुता । सोमाऽ३** (ऊ. अ. ५६४) इति द्विरभ्यासं त्वाष्ट्रीसाम (द्वितीयं **स्वारंत्वाष्ट्रीसाम** वा) चेति सामनी गीयेते ॥१॥

पुना पृश्न्याभीशवोत्तरे ॥२॥

पुनानः सोम– (सा. ६७५–६) इति ऋचोः **पुनानाऽ२३स्सोमधारयाहाउ** (ऊ. अ. ५६५) इति **पृश्नि, पुनानस्सोमधारयाए** (ऊ. अ. ५६६) इत्याभीशवोत्तरं चेति सामनी भवतः ॥२॥

सिष्ठमयम् ॥३॥

अयँसोमः– (सा. १४७१–३) इति तृचे **औहोवाहाऽ३होइ। इहा। अयँसोमाः** (ऊ. अ. ५६७) इति **वासिष्ठ**संज्ञं साम भवति ॥३॥

एदु देव्यम् ॥४॥

एदु मधोः– (सा. १६८४–६) इति तृचे **एऽ५दु । मधोर्मा ऽ३दिन्तराम्** (ऊ. अ. ५६८) इति **वामदेव्याख्यं (महादेव्याख्यं वा**) साम गीयते ॥४॥

स्वानो गौषूक्तम् ॥५॥

परि स्वानो– (सा. १०६३–५) इति तृचे **परिसुवानोगौ । हौहोवाहाइ** (ऊ. अ. ५६९) इति **गौषूक्ता**भिधं साम भवति ॥५॥

प्राणा वारम् ॥६॥

प्राणा शिशुः– (सा. १०१३–५) इति तृचे **प्राणाशिशा औहोहाइ** (ऊ. अ. ६००) इति **वारवन्तीय**मिति साम गीयते ॥६॥

दक्षसा सत्रा ॥७॥

पवस्व दक्षसाधनः- (सा. ६१९–२१) इति तृचे **पवाऽ३४। स्वदक्षसाधनः** (ऊ. अ ६०१) इति **सत्रासाहीया**ख्यं साम गीयते ॥७॥

परि प्रि द्वाजम् ॥८॥

परि प्रिया दिवः– (सा. ६३४–७) इति तृचे **परिप्रिया । दिव४कवाइः** (ऊ. अ. ६०२) इति **भारद्वाजाख्यं** (**बृहद्भारद्वाजाख्यं** वा) साम गीयते ॥८॥

ऊर्मिणा क्रोशम् ॥९॥

सोम४पुनान ऊर्मिणा– (सा. ६४०–२) इति तृचे **सोमाः। पुनानऊर्मि । णा** (ऊ. अ. ६०३) इति **क्रोश**संज्ञं साम भवति ॥६॥

तोषि वाम्रमानवानूपानि ॥१०॥

परीतो षिञ्चता– (सा. १३१३–५) इति तृचे **परीतोषिञ्चता । हाऽ३हाऽ३इ** (ऊ. अ. ६०४) इति **वाम्रम्**, **होवाइ। परीतोषिञ्चतासुतम् । होवाइ** (ऊ. अ. ६०५) इति **मानवोत्तरम्**, **पराइपराइ** (ऊ. अ. ६०६) **आनूपंवाध्य्रश्वं** चेति त्रीणि सामानि भवन्ति ॥१०॥

श्रीणाग्नेयम् ॥११॥

श्रीणन्तो गोभिः– (सा. १३१४^d–५) इति सपादर्चि **श्रीणन्तोगो** (ऊ. अ. ६०७) इति **अग्नेस्त्रिणिधना**भिधं साम गीयते ॥११॥

सोमाः श्यावागवनिषेधाः॥१२॥

सोमा४पवन्त इन्दवः– (सा. ११०१–३) इति तृचे **सोमाऽ३१ः । पाऽ३व । तइ** (ऊ. अ. ६०८) इति **श्यावाश्वम्**, **सोमा४पवन्तआऽ१इन्दवाः** (ऊ. अ. ६०९) इत्या**न्धीगवं**, **सोमा४ पवन्ताऽ३इन्दवाः** (ऊ. अ. ६१०) इति **निषेध**श्चेति त्रीणि सामानि भवन्ति ॥१२।

पवस्व श्यावागन्धे ॥१३॥ चतुर्थः॥४॥

पवस्व वाजसातये– (सा. १०१६–८) इति तृचे **पवाऽ३१। स्वाऽ२वाः। जसा** (ऊ. अ. ६११) इति **श्यावाश्वम्**, **पवस्ववाजसाऽ१तयाइ** (ऊ. अ. ६१२) इत्या**न्धीगवं** चेति सामद्वयं भवति ॥१३॥

अयं चतुर्थो विंशः ॥

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगानेऽहीनपर्वणि चतुर्थः खण्डः॥४॥

—◇—

[ऊहगानेऽहीनपर्वणि पञ्चमः खण्डः]

एतास्वेवाकूपारम् ।।१।।

एतास्वेव पूर्वोक्तासु पवस्वादिषु ऋक्षु **पवस्वऽ२३वाज । साताऽ२३४याइ** (ऊ. अ. ६१३) इत्याकूपाराख्यं साम गीयते ।।१।।

सोमाः क्रौञ्चाद्यम् ।।२।।

सोमा४पवन्त इन्दवः– (सा. ११०१–३) इति तृचे **सोमा४पवौहो । ताइन्दवाः** (ऊ. अ. ६१४) इति **क्रौञ्चाद्या**भिधं साम भवति ।।२।।

सुता त्वाष्ट्र्यूर्ध्वेडम् ।।३।।

सुतासो मधुमत्तमाः (सा. ८७२–५) इति तृचे **सुतासो मधुमत्तमाः**– (ऊ. अ. ६१५) **इत्यूर्ध्वेडंत्वाष्ट्रीसामाख्यं** साम गीयते ।।३।।

पुरः शुद्धापदान्तम् ।।४।।

पुरोजिती वो– (सा. ६९७–९) इति तृचे **पुरोजितीबोअन्धसाः** (ऊ. अ. ६१६) इति **पदान्तशुद्धाशुद्धीयं (पदनिधनशुद्धाशुद्धीयं** वा) नाम साम भवति ।।४।।

असा क्षितमैडम् ।।५।।

असाव्यंशुः– (सा.१००८–१०) इति तृचे **असाव्यꣳशो । हाइ** (ऊ. अ. ६१७) इति **ऐडं सैन्धुक्षितं** साम गीयते ।।५।।

तोर्षि यौधाद्वैगते ।।६।।

परीतो षिञ्चता– (सा. १३१३–५) इति तृचे **पराऽ३१इ । तोऽ३षि । च** (ऊ. अ. ६१८) इति **यौधाजयम्, परीतोऽ३षिञ्चतासुताम्** (ऊ. अ. ६१९) इति **द्वैगतं** चेति सामनी गीयेते ।।६।।

श्रीहन्मनम् ।।७।।

श्रीणन्तोगोभिरुत्तरम्– (सा. १३१४d–५) इति सपादर्चि **श्रीणन्तोऽ३गोभिरुत्तराम्** (ऊ. अ. ६२०) इति गीयमानं साम **पौरुहन्मनमि**त्युच्यते ।।७।।

पुरः पारसाध्रे ॥८॥

पुरोजिती वो– (सा. ६९७–९) इति तृचे **पुरो जाऽ२३इतिवः। अन्धाऽ२३४सा** (ऊ. अ. ६२१) इत्याकूपारम्, **पुरोजाऽ३इतीवोअन्धसाः** (ऊ. अ. ६२२) इति **साध्रं** चेति सामनी भवतः ॥८॥

पवस्व वात्रेयम् ॥९॥

पवस्व वाजसातये– (सा. १०१६–८) इति तृचे **पवस्ववा। जसाताऽ२३याइ** (ऊ. अ. ६२३) इत्यात्रेयसंज्ञं साम भवति ॥९॥

परि प्रि षूक्तमेकस्याम् ॥१०॥

परि प्रिया– (सा. ८३५) इत्यस्यामृचि **परिप्रियादिवौ। हौहोवाहाइ** (ऊ. अ. ६२४) इति गीयमानं साम **गौषूक्त**मित्युच्यते ॥१०॥

प्रत्यस्मै वितम् ॥११॥

प्रत्यस्मै पिपीषते– (सा. १४४०–२) इति तृचे **प्रति। अस्माऽ३इ। पिपीषिताइ** (ऊ. अ. ६२५) इति **गौरीविता**ख्यं साम भवति ॥११॥

इन्द्राच्युतम् ॥१२॥

इन्द्रायेन्द्रो– (सा. १०७६–८) इति तृचे **इन्द्रा। इहा** (ऊ. अ. ६२६) इति **दार्ढच्युत**संज्ञं साम गीयते ॥१२॥

प्रसु दासोत्तरमृचि ॥१३॥

प्र सुन्वानाय–(सा. ७७४) इत्यस्यामृचि **प्राऽ४सुन्वाना। हो** (ऊ. अ. ६२७) इतीदं साम दैवोदासोत्तरमिति कथ्यते ॥१३॥

अभि प्रि ज्ञीयम् ॥१४॥

अभि प्रियाणि– (सा. ७००–२) इति तृचे **अभाऽ५प्रि। याऽ३णाऽ३इपवताइ** (ऊ. अ. ६२८) इति यत् साम गीयते तद् **यज्ञायज्ञीय**मित्यभिधीयते ॥१४॥

नमस्ते जरा ॥१५॥

नमस्ते अग्ने–(सा. १६४८–५०)इति तृचे **नमस्तओवा**(ऊ. अ ६२९) इति **जराबोधीय**-संज्ञं साम भवति ॥१५॥

वृषा ज्ञीयम् ।।१६।।

वृषा मतीनाम्– (सा. ८२१–३) इति तृचे **वृषाऽ५म । ताऽ३इनाऽ३म्पवताइ** (ऊ. अ. ६३०) इति गीयमानं साम **यज्ञायज्ञीयमित्युच्यते** ।।१६।।

स्वासु भरम् ।।१७।।

तं गूर्धया– (सा. १६८७–८) इति ऋचोर्गीयमानं **तंगूऽ३र्धाऽ३यासुवर्णरोवा** (ऊ. अ. ६३१) इतीदं साम **सौभरमित्यभिधीयते** ।।१७।।

एना मित्रे ।।१८।। पञ्चमः।।५।।

एना विश्वानि– (सा. ६७४) इत्यस्यामृचि **एनाविश्वान्यर्यआऽ३ए** (ऊ. अ. ६३२) इति **सौमित्रसंज्ञं** साम भवति ।।१८।।

अयं **पञ्चमो** विंशः

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगानेऽहीनपर्वणि पञ्चमः खण्डः ।।५।।

[ऊहगानेऽहीनपर्वणि षष्ठः खण्डः]

पवस्व द त्वाष्ट्री यदीङ्ख्यन्त्याम् ।।१।।

पवस्व दक्षसाधनो– (सा. ९१९–२१) इति तृचे **पवस्वदा** (ऊ. अ. ६३३) इति तद् रूपमेव **त्वाष्ट्रीसाम** गीयते **यद्**, **यद्रूपम् ईङ्ख्यन्त्याम्**, **ईङ्ख्यन्तीरपस्युवः**–(सा. १७५) इत्यस्यामृचि ग्रामेगेये गीयते ।।१।।

अभि सो दᳪष्ट्रोत्तरमृचि ।।२।।

अभि सोमासः– (सा. ८५६) इत्यस्यामृचि **अभिसोमास आयवऐपावौ** (ऊ. अ. ६३४) इति **आष्टादᳪष्ट्रोत्तरं** साम गीयते ।।२।।

तृचे भीशवोत्तरम् ।।३।।

अभि सोमासः– (सा. ८५६–७) इति **तृचे** तिसृषु स्त्रोत्रीयासु तृचे **अभिसोमास-आयवए** (ऊ. अ. ६३५) इत्या**भीशवोत्तरं** साम गीयते ।।३।।

स्वःपृष्ठं हिन्वा ।।४।।

प्र हिन्वानः– (सा ८५७d–८) इति सपादर्चि **प्रहाऽ२इन्वानाऽ३४ः** (ऊ. अ. ६३६) **स्वःपृष्ठं** साम भवति ।।४।।

वयमे सिष्ठम् ।।५।।

वयमेनम्– (सा. १६६१–२) इति ऋचोर्**वयमेनमिदा** (ऊ. अ.६३७) इति **वासिष्ठं** (**इदावासिष्ठं** वा) साम गीयते ।।५।।

पुरः क्षुल्ललेयम् ।।६।।

पुरोजिती वो– (सा. ६९७–९) इति तृचे **पुरोजितीवोऽ१न्धसाः** (ऊ. अ. ६३८) इति **क्षुल्लककालेयं** साम गीयते ।।६।।

त्वमिन्द्र द्विहिंकादेव्यम् ।।७।।

त्वमिन्द्र यशाः– (सा. १४११–२) इति ऋचोस्**तुवमाऽ२३इन्द्रयशाअसाइ** (ऊ. अ. ६३९) इति **द्विहिङ्कारवामदेव्यं** साम गीयते ।।७।।

प्राणा वार्शम् ।।८।।

प्राणा शिशूः– (सा. १०१३–५) इति तृचे **प्राणाशिशुः** (ऊ. अ. ६४०) इति **वार्शं** साम भवति ।।८।।

पवस्व ज्ञीयम् ।।९।।

पवस्व वाजसातये– (१०१६–८) इति तृचे **पवाऽ५स्व। वाऽ३जाऽ३सातयाइ** (ऊ. अ. ६४१) इति **यज्ञायज्ञीया**भिधं साम गीयते ।।९।।

बृहदाग्नेयं नरः।।१०।।

अग्नि नरो– (सा. १३७३–५) इति तृचे **अग्निन्नरोदीधितिभिः** (ऊ. अ.६४२) इतीदं साम **बृहदाग्नेय**मित्युच्यते ।।१०।।

तोदः श्रोणम् ।।११।।

श्रोणन्तो गोभिरुत्तरम्– (सा. १३१४d–५) इति सपादर्चि **हाउहाउहाउवा। श्रोणन्तो-गोभिरुत्तरम्** (ऊ. अ. ६४३) इति **प्रतोद**संज्ञं साम भवति ।।११।।

पिबा पृष्ठम् ।।१२।।

पिबा सुतस्य– (सा. १४२१–२) इति ऋचोः **पिबाऽ३सुतस्यरसिना:** (ऊ. अ. ६४४) इति **पृष्ठं** साम गीयते ।।१२।।

अध्वर्यो पर्णेडकूलीये ।।१३।।

अध्वर्यो अद्रिभिः– (सा. १२२५–७) इति तृचे **अध्वर्यओबा** (ऊ. अ. ६४५) इत्यैड**ꣳसौपर्णम्, अध्वर्योअद्रिभाइ:** (उ. अ. ६४६) इति **रोहितकूलीयं** चेति सामनी गीयेते ।।१३।।

तव हन्म–गत–गौङ्ग्व–यास्यानि ।।१४।।

तवाहꣳसोम रारणा– (सा. ६२२–३) इति ऋचोस्त**वाहाऽ३ꣳसोमरारणा** (ऊ. अ. ६४७) इति **पौरुहन्मनम्, तवाहाऽ३ꣳसोमरारणा** (ऊ. अ. ६४८) इति **द्वैगतम्, तवाहाऽ३ꣳसोमरारणा** (ऊ. अ. ६४९) इति **गौङ्ग्वम्, तवाहꣳसोमरारण** (ऊ. अ. ६५०) इति **साप्तमिकमायास्यं (द्विनिधनमायास्यं** वा**)** चेति चत्वारि सामानि गीयन्ते ।।१४।।

स्वासु वाराहवाशे ।।१५।। षष्ठः।।६।।

स्वासु स्वस्वप्रकृतिषु **वाराहवाशे** गीयेते । यथा– **प्र काव्यम्** (१११६–८) इति तृचे **हाउहाउ । हुप् । प्रकावियाम्** (ऊ. अ. ६५१) इति **वाराहम्, क ईं वेद** (सा. १६६६–८) इति तृचे **कईंवेदा । सुताइसाऽ१चाऽ२** (ऊ. अ. ६५२) इति **वाशं** च ।।१५।।

अयं **षष्ठो** विंशः ।।

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगानेऽहीनपर्वणि षष्ठो खण्डः ।।६।।

–◇–

[ऊहगानेऽहीनपर्वणि सप्तमः खण्डः]

पवस्व क्षितमैडम् ।।१।।

पवस्व देवः– (सा. १२३५–७) इति तृचे **पवस्वदो । हाइ** (ऊ. अ. ६५३) इति **ऐडꣳसैन्धुक्षितं** साम गीयते ।।१।।

गोमन्नस्त्रैतम् ।।२।।

गोमन्न इन्दो– (सा. १६११–३) इति तृचे **गोमन्नइन्वोअश्वावात्** (ऊ. अ. ६५४) इति **त्रैतं** साम भवति ।।३।।

पुरः क्रौञ्चाद्यगौतमे ।।३।।

पुरोजितीवो– (सा. ६९७–९) इति तृचे **पुरोजितौहोइ** (ऊ. अ. ६५५) इति **क्रौञ्चाद्यम्, पुरोजितीवोअन्धसाः** (ऊ. अ. ६५६) इति **गौतमं** चेति सामद्वयं गीयते ।।३।।

प्रो सारथि ।।४।।

प्रो आसीद्– (सा. ११५२–४) इति तृचे **प्रोआयाऽ२३४सीत्** (ऊ. अ. ६५७) इति **यज्ञसारथि** साम भवति ।।४।।

आ ते स्रौग्मम् ।।५।।

आ ते अग्ने– (सा. १०२२–४) इति तृचे **आऽ२३४। ते अग्नइधी** (ऊ. अ. ६५८) इति **स्रौग्मताख्यं** साम गीयते ।।५।।

हाउहुवाइ शिशुँसिष्ठम् ।।६।।

शिशुञ्जज्ञानम्– (सा. ११७५–७) इति तृचे **हाइ । उहुवाइ । शिशाऽ३४औहोवा** (ऊ. अ. ६५९) इति **वासिष्ठं** साम भवति ।।६।।

परि त्यमूर्ध्वेडत्वाष्ट्रीज्ञीये ।।७।।

परित्यँहर्यतँहरिम्– (सा. १३२९–३१) इति तृचे **परित्यँहर्यतँहाराइम्** (ऊ. अ. ६६०) **इत्यूर्ध्वेडत्वाष्ट्रीसाम, पराऽ५इत्यम् । हाऽ३र्याऽ३तँहाराइम्** (ऊ. अ. ६६१) इति **यज्ञायज्ञीयं** चेति सामनी गीयेते ।।७ ।

पुना मद्गकाण्वे ।।८।।

पुनानः सोम– (सौ. ६७५–६) इति ऋचोः **पुनानस्सोमधारया** (ऊ. अ. ६६२) इति **पौरुमद्गम्, पुनानाऽ३स्सोमधारया** (ऊ. अ. ६६३) **इत्याष्कारणिधनं** चेति सामनी गीयेते ।।८।।

अभी नो निषेध–साध्र–ज्ञीयानि ।।९।।

अभी नो वाजसातमम्– (सा. १२३८–४०) इति तृचे **अभीनोवाजाऽ३सातमाम्** (ऊ. अ.६६४) इति **निषेधः**, **अभीनोऽ३वाजसातमाम्** (ऊ. अ. ६६५) इति **साध्रम्**, **अभाऽ५इनः** (ऊ. अ. ६६६) इति **यज्ञायज्ञीयं** चेति त्रीणि सामानि गीयन्ते ।।९।।

स्तोमं मन्तम् ।।१०।।

इमँस्तोमम्– (सा. १०६४–६) इति तृचे **इमँस्तोममर्हतेजातवेदसाइ** (ऊ. अ. ६६७) इति **समन्तं** साम गीयते ।।१०।।

पुना सोमसाम ।।११।।

पुनानः सोम– (सा. ६७५–६) इति ऋचोः **पुनानस्सोऽ२मधारया** (ऊ. अ. ६६८) इति **सोमसामाख्यं** साम भवति ।।११।।

आत्रेयं पुरः ।।१२।।

पुरोजिती वो– (सा. ६९७–९) इति तृचे **पुरोजिताइ** (ऊ. अ. ६६९) इत्यात्रेयं साम गीयते ।।१२।।

शिशुमुहुवाइ सिष्ठम् ।।१३।।

शिशुञ्जज्ञानम्– (सा. ११७५–७) इति तृचे **उहुवाइ । शिशाऽ३४औहोवा** (ऊ. अ. ६७०) इति **वासिष्ठं (पूर्ववासिष्ठं वा)** साम भवति ।।१३।।

कौत्समभी नः स्वारम् ।।१४।।

अभी नो (सा. १२३८–४०) इति तृचे **अभीनोवाजाऽ३सातमाम्** (ऊ. अ. ६७१) इति **स्वारंकौत्सं** साम गीयते ।।१४।।

धर्ता शार्ङ्गं ।।१५।। सप्तमः।।७।।

धर्ता दिवः– (सा. १२२८–३०) इति तृचे **हाउधार्ता। वा२३४इ** (ऊ. अ. ६७२) इति गीयमानं साम **शार्ङ्ग**मित्यभिधीयते ।।१५।।

अयं **सप्तमो** विंशः ।।

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगानेऽहीनपर्वणि सप्तमः खण्डः ।।७।।

[ऊहगानेऽहीनपर्वणि अष्टमः खण्डः]

हाउहुवा अक्रान् वासिष्ठम् ।।१।।

अक्रान्तसमुद्रः– (सा. १२५३–५) इति तृचे **हाउ। उहुवाइ।अक्राऽ३४औहोवा** (ऊ. अ. ६७३) इति **वासिष्ठसंज्ञं** साम भवति ।।२।।

परित्यमासितोत्तरमिन्द्रापारमभ्यस्तं कचौ ।।२।।

परित्यँहर्यतँहरिम्– (सा. १३२९) इत्यस्यामृचि **पराइत्याऽ२३ँहर्यतँहरिहाइ** (ऊ. अ. ६७४) **इत्यासितोत्तरम्, इन्द्राय सोम**–(सा. १३३१) इत्यस्याम् **इन्द्रायसोमपातवे** **(ऊ अ ६७५) इति द्विरभ्यस्तमाकूपारं (अभ्यस्तमाकूपारं) वा चेति सामनी गीयेते ।।२।**

असा याममैडम् ।।३।।

असावि सोमः– (सा. १३१६–८) इति तृचे **असावाइसोऽ२३। मोअरूषोऽ२३ः** (ऊ. अ. ६७६) इति गीयमानं साम **ऐडं याम**मिति कथ्यते ।।३।।

आजा गृ शनम् ।।४।।

आ जागृविः– (सा. १३५७–९) इयि तृचे **आजा। गृविर्विप्रऋताम्** (ऊ. अ. ६७७) **इत्यौशनं** साम गीयते ।।४।।

परि प्र धन्व वाजजित् ।।५।। अहीनाः।।४।।

प्ररि प्र धन्व– (सा. १३६७–९) इति तृचे **परिप्रधन्वा। होवाऽ३होइ** (ऊ. अ. ६७८) इति **वाजजित्**संज्ञं साम भवति ।।५।।

इति पुष्पसूत्रे प्रथमे प्रपाठक ऊहगानेऽहीनपर्वणि अष्टमः खण्डः ।।८।।

इति **श्रीशेणई**कुलोत्पन्नेन बेल्लिक्कोत्तुग्रामजन्मना जनार्दनशर्मणस्तनूजेन
रामचन्द्रशर्मणा प्रणीतायां साधनाख्यायां पुष्पसूत्रव्याख्यायां
द्वितीये प्रपाठक ऊहगानेऽहीनपर्व समाप्तम् ।।४।।

नवमः खण्डः

विशोवितमृचि ।।१।।

विशोविशो वो– (सा. १५६४–६) इत्यस्यामृचि **विशः। विशोऽ३। वो अतिथिम्** (ऊ. स. ६७९) इति गीयमानं साम **गौरीवितमित्युच्यते** ।।१।।

तं वस्तृचे श्रुध्यम् ।।२।।

तं वः सखायः– (सा. १०९८–११००) इति तृचे **तंवस्सखाऽ२यः** (ऊ. स. ६८०) इति श्रुध्यं साम गीयते ।।२।।

यजिष्ठ मैध्म ।।३।।

यजिष्ठं त्वा– (सा. १४१३–४) इति ऋचोर्**यजिष्ठन्त्वाववृमाहाइ** (ऊ. स. ६८१) इत्यैध्मवाहं साम भवति ।।३।।

जिघ्न पर्णैडकुलीयसन्तनीनि ।।४।।

पवमानस्य जिघ्नतो– (सा. १३१०–२) इति तृचे **पवमानोवा** (ऊ. स. ६८२) **इत्यैडंसौपर्णम्, पवमानजाइ । घ्नताऽ२** (ऊ. स. ६८३) **इति रोहितकूलीयम्, पवाहाउ(ऊ. स** ६८४) इति **सन्तनि** चेति त्रीणि सामानि गीयन्ते ।।४।।

पुना दुक्थम् ।।५।।

पुनानस्सो– (सा. ६७५–६) इति ऋचोः **पुनानस्सोम । धाऽ२रया** (ऊ. स. ६८५) इति **बार्हदुक्थं** साम गीयते ।।५।।

पवमानो जराश्रवसे ।।६।।

पवमानो अजीजनत्– (सा. ८८९–९१) इति तृचे **पवमानोवा** (ऊ. स. ६८६) इति **जराबोधीयम्, पवमाऽ३नोअजीजनात्** (ऊ. अ. ६८७) इति **सौश्रवसं** चेति सामद्वयं गीयते ।।६।।

अभी नः कार्तम् ।।७।।

अभी नो– (सा. १२३८–४०) इति तृचे **अभीहाहाउ । नोऽ२३४वा** (ऊ. स. ६८८) इति **कार्तयशं** साम भवति ।।७।।

प्र सो मार्गी ॥८॥

प्र सोमासो– (सा. ७६४–६) इति तृचे **प्रसौहोवा** (ऊ. स. ६८९) इति **मार्गीयवं** साम गीयते ॥८॥

प्र सोम दे गत–हन्म–हारायणानि ॥९॥

प्र सोम देववीतये– (सा. ७६७–८) इति ऋचोः **प्रसोमा५३देववीतयाइ** (ऊ. स. ६९०) इति **द्वैगतम्, प्रसोमा५३देववीतयाइ** (ऊ. स. ६९१) इति **पौरुहन्मनम्, प्रसोमदौहो५२इव-वीतयाइ** (ऊ स. ६९२) इति **हारायणं** चेति त्रीणि सामानि गीयन्ते ॥९॥

स्वादि काक्षीभासे ॥१०॥

स्वादिष्ठया मदिष्ठया– (सा. ६८९–९१) इति तृचे **स्वादिष्ठा५३यामदिष्ठया**(ऊ. स. ६९३) इति **काक्षीवतम्, स्वादि। ष्ठा३या।** मा (ऊ. स. ६९४) इति **भासं** चेति सामनी गीयेते ॥१०॥

प्र सु शुद्धापदान्तम् ॥११॥

प्रसुन्वानाय– (सा. १३८६–८) इति तृचे **प्रसुन्वानायअन्धसाः** (ऊ. स. ६९५) इति **पदनिधनशुद्धाशुद्धीयं (पदान्तशुद्धाशुद्धीयं** वा) साम भवति ॥११॥

वृषा सुरूपोत्तरर्षभे ॥१२॥

वृषा पवस्व धारया– (सा. ८०३–५) इति तृचे **वृषापवौहो५२वा** (ऊ. स. ६९६) इति **सुरूपोत्तरम्, हाहाउवृषापवा** (ऊ. स. ६९७) इति **ऋषभः पवमानश्**चेति सामनी गीयेते ॥१२॥

पुना पृष्ठे ॥१३॥ प्रथमः॥१॥

पुनानः सोम– (सा. ६७५–६) इति ऋचोः पुना५३नस्सोमधारया (ऊ. स. ६९८) इति पृष्ठसञ्ज्ञ साम भवति ॥१३॥

अयं **प्रथमो** विंशः ॥

इति पुष्पसूत्रे द्वितीये प्रपाठके ऊहगाने सत्रपर्वणि नवमः खण्डः ॥९॥

—◇—

[ऊहगाने सत्रपर्वणि दशमः खण्डः]

एतास्वेव कौल्मल ।।१।।

एतास्वेव पुनान–स्तोत्रियासु **कौल्मलबर्हिषं** नाम साम पुनाऽ३नाऽ३स्सोमधारया (ऊ. स. ६९९) इति गीयते ।।१।।

एष स्य शङ्कु ।।२।।

एष स्य धारया– (सा. ५८४–५) इत्येतयोर्ऋचोरेषस्यधा । एऽ२। रया (ऊ. स. ७००) इति **शङ्कुसंज्ञं** साम गीयते ।२।।

काण्वमाष्कृतमभि सो ।।३।।

अभि सोमासः– (सा. ८५६–७) ऋचोरभिसोऽ३मासआयवः (ऊ. स. ७०१) इति **आष्कारणिधनकाण्वं** साम गीयते ।।३।।

पुना वाशम् ।।४।।

पुनानः सोम– (सा. ६७५–६) इति ऋचोर्गीयमानं **पुनानस्सो** (ऊ. स. ७०२) इति साम **वाशमित्यभिधीयते** ।।४।।

औशनꣳ साकम् ।। ५ ।।

साकमुक्षो मर्जयन्त– (सा. १४१८–२०) इति तृचे **साकाम् । उक्षोमर्जयन्ता** (ऊ. स. ७०३) **इत्यौशनं** साम भवति ।।५।।

इमा धसम् ।।६।।

इमा उ त्वा– (सा.१६०७–८) इति ऋचोरध्यूढम् **आऽ२३४इ । माउत्वापुरू । वसाउ** (ऊ. स. ७०४) इतीदं साम **नौधसमित्युच्यते** ।।६।।

गोमत् पौष्कलम् ।।७।।

गोमन्न इन्दो –(सा. १६११–३) इति तृचे **गोमन्नोऽ३इन्दो । अश्वाऽ२३४वात्** (ऊ. स. ७०५) इति **पौष्कलं** साम गीयते ।।७।।

उभयं वाशम् ।।८।।

उभयꣳशृणवच्च नः–(सा. १२३३–४) इति ऋचोरधिगतम् **उभयꣳशा** (ऊ. स. ७०६) इति यत् साम तद् **वाशमित्यभिधीयते** ।।८।।

त्वामि मानवोत्तरम् ॥९॥

त्वा मिदा ह्यो– (सा. ८१३–४) इति ऋचोर्होवाइ । **त्वामिदाह्योनरः** (ऊ. स. ७०७) इतीदं साम **मानवोत्तर**मिति कथ्यते ॥९॥

कई काण्वमाष्कृतम् ॥१०॥

क ई वेद– (सा. १६९६–८) इति तृचे **कईवोऽ३दसुतेसचा** (ऊ. स. ७०८) इत्याष्कारणिधनकाण्वं साम गीयते ॥१०॥

अभि–शग्धि मानवाद्यम् ॥११॥

अभि सोमासः– (सा. ८५६–७) इति ऋचोर**भिसोमा** (ऊ. स. ७०९) इति तथैव **शग्ध्यूऽ३षु** (सा. १५७९–८०) इति तृचे **शग्ध्यूषू** (ऊ. स. ७१०) इति च **मानवाद्य**नामनी सामनी गीयेते ॥११॥

आ त्वा द्वाजम् ॥१२॥

आ त्वा सहस्रम्– (सा. १३९१–३) इति तृचे **आत्वासहा** (ऊ. स. ७११) **भारद्वाजं** साम भवति ॥१२॥

योरा नित्रम् ॥१३॥

यो राजा– (सा. ९३३–४) इति ऋचो**र्योराजाऽ३चर्षणाइनाम्** (ऊ. स. ७१२) इति **जनित्राद्यं** साम भवति ॥१३॥

यशस्त्वमिन्द्र ॥१४॥

त्वमिन्द्र यशाः– (सा. १४११–२) इति ऋचो**स्त्वमिन्द्रा । यशाः । असाइ** (ऊ. स. ७१३) इति **इन्द्रस्ययशो** नामकं साम भवति ॥१४॥

अग्निर्मू सत्रा ॥१५॥

अग्निर्मूर्धा (सा. १५३२–४) इति तृचे **अग्नाऽ३४इः** (ऊ. स. ७१४) इति **सत्रासाहीयं** साम भवति ॥१५॥

पिबा जमवर्तः ॥१६॥

पिबा सुतस्य– (सा. १४२१–२) इति ऋचोः **पिबासुतस्यरसिनोमत्स्वाहाउ** (ऊ. स. ७१५) इति **जमदग्नेरभीवर्ताख्यं** साम गीयते ॥१६॥

काण्वमामन्द्रैरभिनिधनम् ।।१७।।

आ मन्द्रैरिन्द्र– (सा. १७१८–२०) इति तृचे **औहोहोहाइ । आइही । आमा** (ऊ. स.७१६) इत्यभिनिधनं काण्वं साम भवति ।।१७।।

यथा मनाज्यम् ।।१८।।

यथा गौरो– (सा. १७२१–२) इति ऋचोर्यथागौऽ२३रोअपाकृताम (ऊ. स. ७१७) इति **मनाज्यं (गौतमस्य मनाज्यं वा)** नाम साम गीयते ।।१८।।

त्वमङ्गमीढे ।।१९।। द्वितीयः ।।२।।

त्वमङ्ग प्रशꣳ**सिषः –** (सा. १७२३–४) इति ऋचोस्तुवम । गप्राऽ३४औहोवा (ऊ. स. ७१८) इति **पौरुमीढं** साम भवति ।।१९।।

अयं **द्वितीयो** विंशः

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगाने सत्रपर्वणि दशमः खण्डः ।।१०।।

[ऊहगाने सत्रपर्वणि एकादशः खण्डः]

आ त्वेन्द्र सुतोद्वंशीयम् ।।१।।

आ त्वा विशन्तु (सा. १६६०–२) इति तृचे **आत्वाविशन्त्विन्दवआ** (ऊ. स. ७१९) इति **इन्द्र सुतेषु** (७४६–८) इति तृचे **इन्द्रसुतेषुसोमेष्वा** (ऊ. स. ७२०) इति **चोद्वंशीये** सामनी भवतः ।।१।।

प्रति ष्यैषो जरा ।।२।।

प्रति ष्या (सा. १७२५-७) इति तृचे **प्रतिष्यासोवा** (ऊ. स. ७२१) इति **एषो उषा** **(सा. १७२८–३०) इति** तृचे **एषो** उषोवा (ऊ. स. ७२२) इति च **द्वे** अपि सामनी **जरा–बोधीयसंज्ञे भवतः** ।।२।।

श्रुध्यमुषस्ताश्वि ।।३।।

उषस्तच्चित्रमा– (सा. १७३१–३) इति तृचे **उषस्तच्चाऽ२इत्रम्** (ऊ. स. ७२३) इति **अश्विना वर्तिरस्मदा** (सा. १७३४–६) इति तृचे **अश्विनावाऽ२र्तिः** (ऊ. स. ७२४) इति च सामद्वयं **श्रुध्यसंज्ञं** भवति ।।३।।

प्र तु ज्योतिषं यत्प्र गायतेति ।।४ ।।

प्र गायत– (सा. ५३५) इत्यस्यामृचि ग्रामेगेये यद् **वैश्वज्योतिषं** भवति तदेवात्र **प्र तु द्रव** (सा. ६७७–९) इति तृचे **प्रतुद्रवा । परिको । शन्निषीदा** (ऊ. स. ७२५) इति गीयते ।।४।।

आ बो इदमा भा इत्यौशनानि ।।५ ।।

अबोध्यग्निः– (सा. १७४६–८) इति तृचे **अवो । धियाग्निस्समिधा** (ऊ. स. ७२६) इति, **इदँश्रेष्ठं ज्योतिषाम्–**(सा. १७४९–५१) इति तृचे **आइदाम् । श्रेष्ठञ्ज्योतिषाञ्ज्यो** (ऊ. स. ७२७) इति **आभात्यग्निः–** (सा. १७५२–४) इति तृचे **आभा । तियग्निरुषसाम्** (ऊ. स. ७२८) इति च **त्रीण्यौशनानि** सामानि भवन्ति ।।५।।

आशूच्चा ।।६।।

उच्चा ते– (सा. ६७२–४) इति तृचे **उच्चाते । तेजातमन्धाऽ३साः** (ऊ. स. ७२९) इत्या**शुभार्गव**नामकं साम गीयते ।।६।।

त्वँ सत्रा ।।७।।

त्वँ ह्या३ङ्ग– (सा. ९३८–९) इति **ऋचोस्तुवाऽ३४म् । हियङ्गदैविय । ओऽ६वा** (ऊ. स. ७३०) इति **सत्रासाहीय**नामकं साम भवति ।।७।।

श्रुध्यं पवस्व ।।८।।

पवस्व देववीतये– (सा. १३२६–८) इति तृचे **पवस्वदाऽ२इव** (ऊ. स. ७३१) इति **श्रुध्य**नामकं साम भवति ।।८।।

अभि प्रि सिष्ठं यदेष प्र कोश इति ।।९।।

एष प्र कोशे– (सा. ५५६) इत्यस्यामृचि ग्रामेगेये **यद् वासिष्ठं** साम गीयते तदेव **अभि प्रियाणि–** (सा. ७००–२) इति तृचे **अभीप्रियाणीऽ२** (ऊ. स. ७३२) इति गीयते । यच्चेह **वैधृतं वासिष्ठ**मिति कथ्यते ।।९।।

जनस्यैतोबो कावानि ।।१०।।

जनस्य गोपा– (सा. ६०७–६) इति तृचे **जनोवा** (ऊ. स. ७३३) इति, **एता उ त्या–** (सा. १७५५–७) इति तृचे **एतोवा** (ऊ. स. ७३४) इति **अवोध्यग्निर्ज्म–** (सा. १७५८–६०) इति तृचे **अबोवा** (ऊ स. ७३५) इति च त्रीणि सामानि **कावसंज्ञानि** भवन्ति ।।१०।।

तोषि कण्वरम् ।।११।।

परीतो षिञ्चता– (सा. १३१३–४) इति ऋचोः **परीतोषिञ्चतासुताम्** (ऊ. स. ७३६) इति **कण्वरथन्तर**नामकं साम गीयते ।।११।।

तं ते भरम् ।।१२।।

तं ते मदम्– (सा. ८८०–२) इति तृचे **तन्ताइमाऽ३दंगृणीमसोवा** (ऊ. स. ७३७) इति **सौभर**संज्ञं साम भवति ।।१२।।

पुना छन्दसमेकस्याम् ।।१३।। तृतीयः।।३।।

पुनानः सोम– (सा. ६७५) इत्यस्यामृचि **पुनानस्सो । हो । मधारयाऽ६ए** (ऊ. स. ७३८) इति **माधुच्छन्दस**नामकं साम गीयते ।।१३।।

अयं **तृतीयो** विंशः ।।

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगाने सत्रपर्वणि एकादशः खण्डः ।।११।।

[ऊहगाने सत्रपर्वणि द्वादशः खण्डः]

तवाहं पृश्न्येकस्याम् ।।१।।

तवाहँसोम– (सा. ६२२) इत्येकस्यामृचि **तवाहाऽ२ँसोमरारणहाउ** (ऊ. स. ७३९) इति **पृश्नि**नामकं साम भवति ।।१।।

अप्सा मार्गी ।।२।।

अप्सा इन्द्राय– (सा. ९९५) इत्यस्यामृचि **अप्सौहोवा** (ऊ. स. ७४०) **इति मार्गीयव-**नामकं साम गीयते ।।२।।

गोमानाग्नेयं पङ्क्त्याम् ।।३।।

अनूपे गोमान्– (सा. ९९८) इत्येकस्यामृचि **अनूपेगो** (ऊ. स. ७४१) इति **पङ्क्त्यां** परिवर्त्य यद् गीयते साम तद**ाग्नेय**मित्यभिधीयते ।।३।।

सन्तनीन्द्रः ।।४।।

इन्द्रो मदाय–(सा. १००२–४) इति तृचे **इन्द्रोहाउ** (ऊ. स. ७४२) इति **सन्तनि**संज्ञं साम भवति ।।४।।

गोष्ठः पुना पङ्क्त्याम् ।।५।।

पुनानो वारे– (सा. १०८०) इत्यस्यामृचि **हाउहाउहाउवा । पुनानोवारेपवमानोअव्यये** (ऊ. स. ७४३) इतीदं साम **पङ्क्त्यां** परिवर्त्य गीयमानम् **अङ्गिरसांगोष्ठ**मिति कथ्यते ।।५।।

तं त्वा मार्गी ।।६।।

तं त्वा धर्तारम्– (सा. ८०४) इत्येकस्यामृचि **तन्त्वौहोवा** (ऊ. स. ७४४) इति **मार्गीयव**नामकं साम भवति ।।६।।

वयं घ सन्तनि ।।७।।

वयं घ त्वा– (सा. ८६४–६) इति तृचे **वायाँहाउ** (उ. स. ७४५) इति **सन्तनि**नामकं साम भवति ।।७।।

प्र हिन्वा छिद्रम् ।।८।।

प्र हिन्वानः– (सा. ८५७d–८) इति सपादर्चि **प्रहिन्वानाः** (ऊ. स. ७४६) इत्य**च्छिद्र-**नामकं साम गीयते ।।८।।

अभी नस्त्वाष्ट्रचेकस्यां त्र्यन्तम् ।।९।।

अभी नो वाजसातमम्– (सा. १२३८) इत्येकस्यामृचि **अभीनोवा** (ऊ. स. ७४७) इति **त्र्यन्तंत्वाष्ट्रीसाम** (**त्रिणिधनंत्वाष्ट्रीसाम** वा) भवति ।।९।।

हिन्वन्तीडानाम् ॥१०॥

हिन्वन्ति सूरम्–(सा. ६०४–६) इति तृचे **औहोइहुवाऽ३होइ । हिन्वन्तिसूऽ३राऽ३मुस्रयः** (ऊ. स. ७४८) इतीडानांसंक्षारो नाम साम गीयते ॥१०॥

उपो चीनेडम् ॥११॥

उपो षु जातम्– (सा. १३३५–७) इति तृचे **उपोषुजातम् । आऽ२प्तुराम्** (ऊ. स. ७४९) इति **प्रतीचीनेडंकाशीतसंज्ञं** साम भवति ॥११॥

उत्सो वितम् ॥१२॥

उत्सो देवो– (सा. ६७५^{d}–६^{ab}) इति पादत्रय **उत्सः । देवोऽ३ । हिरण्ययाः** (ऊ. स. ७५०) इति गीयमानमिदं साम **गौरीवित**मिति निगद्यते ॥१२॥

गृविज्ञीयम् ॥१३॥

आ जागृविः– (सा. १३५७–९) इति तृचे **आजाऽ५गृ । वाऽ३इर्वाऽ३इप्रऋताम्** (ऊ. स. ७५१) इति **यज्ञायज्ञीयं** साम भवति ॥१३॥

पवमा कण्वरम् ॥१४॥

पवमानाभ्यर्षसि– (सा. १०७^{cd}–८०^{ab}) इति पादयत्रे **पवमानाभिर्षसाइ** (ऊ. स. ७५२) इति **कण्वरथन्तराख्यं** साम गीयते ॥१४॥

प्र सोमाभीकपर्णैडे ॥१५॥

प्र सोमासो विपश्चितः– (सा. ७६४–६) इति तृचे **प्राऽ२३४सोमासोऽ५** (ऊ. स.७५३) **इत्याभीकम्, प्रसोमासोवा** (ऊ. स. ७५४) इत्यैडसौपर्णं चेति सामनी गीयेते ॥१५॥

प्र सो द्विहिंकादेव्यम् ॥१६॥

प्र सोम देववीतये– (सा. ७६७–८) इति ऋचोः **प्रसोमाऽ२३देववीतयाइ** (ऊ. स. ७५५) इति **द्विहिंकारवामदेव्यं** साम भवति ॥१६॥

स्वादि शवम् ॥१७॥

स्वादिष्ठया– (सा. ६८९–९१) इति तृचे **स्वादिष्ठयामदिष्ठाया** (ऊ. स. ७५६) इति **शैशवनामकं** साम गीयते ॥१७॥

प्रसु वैश्वामित्रस्वारकौत्से ॥१८॥ चतुर्थः ॥४॥

प्र सुन्वानायान्धसः– (सा. १३८६–८) इति तृचे **प्रसुन्वानायअन्धसः** (ऊ. स. ७५७) इति **वैश्वामित्रम्, प्रसुन्वानायाऽ३अन्धसाः** (ऊ. स. ७५८) इति **स्वारं कौत्सं** चेति सामनी गीयन्ते ॥१८॥

अयं **चतुर्थो** विंशः

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगाने सत्रपर्वणि द्वादशः खण्डः ॥१२॥

[ऊहगाने सत्रपर्वणि त्रयोदशः खण्डः]

एतास्वेवौरुक्षयम् ॥१॥

एतास्वेव पूर्वोक्तासु प्रसुन्वानस्तोत्रियासु **प्रसुन्वानायअन्धसाः** (ऊ. स. ७५९) इत्यौ**रुक्षया**ख्यं साम भवति ॥१॥

वृषा हरिश्री ॥२॥

वृषा पवस्व– (८०३–५) इति तृचे **वृषापवस्वधारया । वृषापवा** (ऊ. स. ७६०) इति **हरिश्रीनिधननामकं** साम गीयते ॥२॥

यस्ते शाम्म-दावाश्वसूक्तानि ॥३॥

यस्ते मदो वरेण्यः–(सा.८१५–७) इति तृचे **यस्तेमदोवऐ** (ऊ. स.७६१)इति **शाम्मदम्, यस्तेमाऽ२३दोवरेणियोहाउ** (ऊ. स. ७६२) इति **दावसुनिधनम्, आऔहोवाहाइ । यस्तेमदाः** (ऊ. स. ७६३) इति **आश्वसूक्तं** चेति त्रीणि सामानि गीयन्ते ॥३॥

अयं पू कौत्समैडम् ॥४॥

अय पूषा– (सा. ८१८–२०) इति तृचे **अयॅंहोपूऽ२३ । षारयिर्भगईया** (ऊ. स. ७६४) इत्यै**डंकौत्सं** साम भवति ॥४॥

उच्चा मित्र-टत-साक-लम्बानि ।।५।।

उच्चा ते जातम्– (सा. ७५२–४) इति तृचे **उच्चाते जातमन्धसाऽ३ए** (ऊ. स. ७६५) इति **सौमित्रम्, उच्च । एऊच्चा** (ऊ. स. ७६६) इत्यैटतम्, **उच्चतेजाऽ३ । होऽ३होऽ३१इ** (ऊ. स. ७६७) इति **धुरासाकमश्वम्, उच्चातेजातमन्धसः** (ऊ. स. ७६८) इति **विलम्बसौपर्णं** चेति चत्वारि सामानि गीयन्ते ।।५।।

औशनवैरूपे तिस्रः ।।६।।

तिस्रो वाचः– (सा. ८६९–७१) इति तृचे **तिस्रोवाचाः** (ऊ. स. ७६९) इत्यौ**शनम्, तिस्रोवा**ऽ२३४**चाः** (ऊ. स. ७७०) इति **वैरूपं** चेति सामनी गीयेते ।।६।।

सुता साध्रवाश्वे ।।७।।

सुतासो मधुमत्तमाः– (सा. ८७२–४) इति तृचे **सुतासो**ऽ३**माधुमत्तमाः** (ऊ. स. ७७१) इति **साध्रम्, सुता**ऽ३१ **। सो**ऽ३**र्मा । धुम । ता**ऽ३**म** (ऊ. स. ७७२) इति **श्यावाश्वं** चेति सामनी गीयेते ।।७।।

तवाहं पुष्प–दुक्थ–माण्डवानि विदावस्विति यस्य निधनम् ।।८।।

तवाहꣳसोम– (सा. ९२२–३) इति ऋचोस्**तवाहꣳसोमरारण । हुवे**ऽ२३ (ऊ. स. ७७३) इत्य**र्कपुष्पम्, तवाहꣳसोम । रा**२**रणा** (ऊ. स. ७७४) इति **बार्हदुक्थम्, तवाहꣳ सोमरारणा** (ऊ. स. ७७५) इति **विदावस्विति निधनयुक्तं माण्डवं** चेति त्रीणि सामानि गीयन्ते ।।८।।

परि प्रिया मार्गीयवमीनिधनम् ।।९।।

परि प्रिया– (सा. ९३५–७) इति तृचे **परिप्रियादिव**४**कवा**ऽ३**इरे** (ऊ. स. ७७६) इतीनिधनं **मार्गीयवं** साम भवति ।।९।।

पुरः शुद्धीयमैडम् ।।१०।।

पुरोजिती वो– (सा. ९९७–९) इति तृचे **पुरोजितीवोअन्धा**ऽ३**साः** (ऊ. स. ७७७) इत्यै**डशुद्धाशुद्धीयसंज्ञं** साम भवति ।।१०।।

उष्वा वैष्णवाद्ये ।।११।। पञ्चमः ।।५।।

सोम उ ष्वाणः– (सा. ९९७–८) इति **ऋचोः सोमउष्वा । णस्सोऽरतृभाइः** (ऊ. स. ७७८) इति **वैष्णवाद्यं** साम गीयते ।।११।।

अयं **पञ्चमो** विशः ।।

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगाने सत्रपर्वणि त्रयोदशः खण्डः ।।१३।।

--◇--

[ऊहगाने सत्रपर्वणि चतुर्दशः खण्डः]

उष्वा वैष्णवं द्वितीयमेकस्यां तृचे स्तुचम्।।१।।

सोम उ ष्वाणः– (सा. ९९७) इत्येकस्यामृचि **सोमः। सोमाः। उष्वाणस्सोतृभिः** (ऊ. स. ७७९) इति **वैष्णवोत्तरम्, सोम उ ष्वाणः**– (सा. ९९७–८) इति ऋचोः **सोमउष्वाणस्सो-तृभाइः** (ऊ. स. ७८०) इति **तृचे** तिसृषु स्तोत्रीयासु **यौक्तस्तुचं** चेति सामनी गीयेते ।।१।।

असा सोमसामाध्यर्धेडम् ।।२।।

असाव्यंशुः– (सा. १००८–१०१०) इति तृचे **असाव्यंशर्मदायाऽ३ए** (ऊ. स. ७८१) इत्यध्यर्धेडसोमसामनामकं साम गीयते ।।२।।

पवस्व त्रासदस्यवम् ।।३।।

पवस्व वाजसातये– (सा. १०१६–८) इति तृचे **पाऽ२३४। व । स्ववा** (ऊ. स. ७८२) इति **त्रासदष्यवं** नाम साम भवति ।।३।।

परि त्यं वाङ्निधनं क्रौञ्चम् ।।४।।

परि त्यंहर्यतंहरिम्– (सा. १३२९–३१) इति तृचे **पराइत्याꣳहाऽ३२३४ । र्यतम्** (उ. स. ७८३) इति **वाङ्निधनं क्रौञ्चं** साम गीयते ।।४।।

पर्यू वितमृचि ।।५।।

पर्यू षु– (सा. १३६४–६) इति तृचे **परि । ऊषूऽ३। प्रधन्वावा** (ऊ. स. ७८४) **इतोदं** साम **गौरोवितमिति** कथ्यते ।।५।।

ओको ष्णिहमजी ॥६॥

अजीजनो हि– (सा. १३६५) इत्यस्यामृचि **अजाऽ३इजनोहिपवमा** (ऊ. स. ७८५) इत्यौ**ष्णिहम्,** उष्णिहि परिवर्त्य गीयमान**मोकोनिधन**नामकं साम भवति ॥६॥

मृज्य कण्वरमेकस्याम्॥७॥

मृज्यमानः– (सा. १०७९) इत्येकस्यामृचि **मार्ज्यमानस्सुहस्तिया** (ऊ. स. ७८६) इति **कण्वरथन्तर**संज्ञं साम गीयते ॥७॥

तृचे पुष्पोत्तरम् ॥८॥

मृज्यमानः सुहस्त्या–(सा. १०७९–८०) इति ऋचो**र्मृज्यमानस्सुहस्त्या** (ऊ. स. ७८७) इति **तृचे** तिसृषु स्तोत्रीयासु गीयमान**मर्कपुष्पोत्तर**नामकं साम भवति ॥८॥

वृषा षूक्तकले ॥९॥

वृषा पवस्व– (सा. ८०३–५) इति तृचे **वृषापवस्वधौ। हौहोवाहोइ** (ऊ. स. ७८८) इति **गौषूक्तम्, वृषापवाऽ२स्वधारया** (ऊ. स. ७८९) इति **शाकलं** चेति सामनी गीयेते ॥९॥

पुनोभयतःस्तोभं गौतमम् ॥१०॥

पुनानः सोम– (सा. ६७५–६) इति ऋचोः **हाउपुनानस्सोमधारयाहाउ** (ऊ. स. ७९०) इत्यु**भयतःस्तोभं गौतमं** नाम साम भवति ॥१०॥

पुरस्त्वाष्ट्रीस्वारान्तमाकारान्तं च ॥११॥

पुरोजिती वो– (सा. ६९७–९) इति तृचे **पुरः। जिताऽ३इ । हाऽ३हाइ** (ऊ. स. ७९१) इति **स्वारान्तं त्वाष्ट्रीसाम** (**द्विरभ्यासं त्वाष्ट्रीसाम** वा), **पुरोजितीवोअन्धसः। सुताहाउ** (ऊ. स. ७९२) इति **आकारान्तं त्वाष्ट्रीसाम** (**आनिधनं त्वाष्ट्रीसाम** वा) चेति सामनी गीयेते ॥११॥

उच्चा मार्गी ॥१२॥

उच्चा ते जातम्– (सा. ६७२–४) इति तृचे **उच्चौहोवा । तेजाऽ२** (ऊ. स. ७९३) इति **मार्गीयव**संज्ञं साम भवति ॥१२॥

पुना द्विहिंकादेव्य–गत–पुष्पाणि ।।१३।।

पुनानः सोम– (सा. ६७५–६) इति ऋचोः **पुनानाऽ२३स्सोमधारया** (ऊ. स. ७९४) इति **द्विहिंकारवामदेव्यम्**, **पुनानाऽ३स्सोमधारया** (ऊ. स. ७९५) इति **द्वैगतम्**, **पुनानस्सोमधारया** (ऊ. स. ७९६) इत्य**र्कपुष्पं** चेति त्रीणि सामानि गीयन्ते ।।१३।।

अयं पू मधुश्चुत् ।।१४।।

अयं पूषा– (सा. ८१८–२०) इति तृचे **अयंपूषारयिर्भगाऽ३ए** (ऊ. स. ७९७) इति **मधुश्चुन्निधनाख्यं** साम भवति ।।१४।।

य ओजिपुष्पोत्तरे ।।१५।। षष्ठः ।।६।।

य ओजिष्ठः– (सा. ८२०) इत्यस्यामृचि **य ओजिष्ठस्तमाभर । हुवाइ** (ऊ. स. ७९८) इत्य**र्कपुष्पोत्तर**संज्ञं साम भवति ।।१५।।

अयं **षष्ठो** विंशः ।।

स्वाद्याश्वसूक्तमेकस्याम् ।।१६।। सत्राणि ।।५।।

स्वादिष्ठया– (सा. ६८९) इत्येकस्यामृचि आऔहोवाहाइ । **स्वादिष्ठया** (ऊ. स. ७९९) इत्याश्वसूक्तनामकं साम गीयते ।।१६।।

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगाने सत्रपर्वणि चतुर्दशः खण्डः ।।१४।।

इति **श्रीशेणई**कुलोत्पन्नेन बेल्लिक्कोत्तुग्रामजन्मना जनार्दनशर्मणस्तनूजेन
रामचन्द्रशर्मणा प्रणीतायां साधनाख्यायां पुष्पसूत्रव्याख्यायां
द्वितीये प्रपाठक ऊहगाने सत्रपर्व समाप्तम् ।।५।।

ऊहगाने प्रायश्चित्तपर्व

पञ्चदशः खण्डः

प्रत्नमुद्वत् ।।१।।

प्रत्नꣳसधस्थमासदत्– (सा. ६७६^{bcd}) इति पादोर्नचि तृतीयस्तोत्रीयायां **प्रत्नꣳ-सधस्थमा। होऽ२सदात्** (ऊ. प्रा. ८००) इत्युद्वप्राजापत्यनामकं (**उद्वद्भार्गवसंज्ञं** वा) साम गीयते ।।१।।

उप शिक्षा सफम् ।।२।।

उप शिक्षापतस्थुषः– (सा. ७६१) इत्यस्यामृचि **उपशीऽ३क्षाप। तस्थूऽ२३४षाः** (ऊ. प्रा. ८०१) इति **सफ**संज्ञं साम भवति ।।२।।

इन्द्रं विश्वा लेयम् ।।३।।

इन्द्रं विश्वाः– (सा. ८२७–९) इति तृचे **इन्द्रंवाऽ३इश्वाअवीवृधान्** (ऊ. प्रा. ८०२) इति यत् साम गीयते तत् **कालेय**मिति कथ्यते ।।३।।

तं वो भरम् ।।४।।

तं वो दस्मम्– (सा. ६८५–६) इति ऋचोस्**तंवोऽ३दाऽ३स्मामृतीषहोवा** (ऊ. प्रा. ८०३) इति **सौभर**नामकं साम भवति ।।४।।

त्वमङ्ग ककुभम् ।।५।।

त्वमङ्ग प्रशꣳसिषो– (सा. १७२३–४) इति ऋचोस्**त्वमङ्गप्रशꣳसाऽ३इषाः** (ऊ. प्रा. ८०४) इति **त्रैककुभा**ख्यं साम गीयते ।।५।।

वरिवः साहीयम् ।।६।।

वरिवोधातमो– (सा. ६९१) इत्यस्यामृचि **वराऽ३४इ। बोधातमोभुवः। ओऽ६वा** (ऊ. प्रा. ८०५) इति **सत्रासाहीय**नामकं साम भवति ।।६।।

उत्सोऽभिनिधनं काण्वम् ।।७।।

उत्सो देवो– (सा. ६७५^{d}–६^{ab}) इति पादत्रये द्वितीयस्तोत्रीयायाम् **ओहोहोहाइ। आइही। उत्साः** (ऊ. प्रा. ८०६) इत्**यभिनिधनं काण्वं** साम भवति ।।७।।

एष ब्रह्मा लेयम् ॥८॥

एष ब्रह्मा–(सा. १७६८–७०) इति तृचे **एषाऽ३ब्राह्मायाऽ२३:** (ऊ. प्रा. ८०७) इति **कालेयसंज्ञं** साम भवति ॥८॥

आष्कृतं तं वः ॥९॥

तं वो दस्मम्– (सा. ६८५–६) इति ऋचोस्तं**वोदाऽ३स्ममृतीषहाम्** (ऊ. प्रा. ८०८) इतीदं सामाष्कारणिधनं **काण्व**मित्यभिधीयते ॥९॥

वयमु त्वा लेयम् ॥१०॥

वयमु त्वाम्– (सा. ७०८–९) इति ऋचोर्**वयमूऽ३त्वामपूर्विया** (ऊ. प्रा. ८०९) इति **कालेयनामकं** साम गीयते ॥१०॥

उप–दवि-पव ज्ञीयानि ॥११॥

उपास्मै गायता– (सा. ६५१–३) इति तृचे **उपाऽ५स्मै । गाऽ३याऽ३तानराः** (ऊ. प्रा. ८१०) इति, **दविद्युतत्या**– (सा. ६५४–६) इति तृचे **दवाऽ५इद्यु । ताऽ३तीऽऽ३यारुचा** (ऊ. प्रा. ८११) इति, **पवमानस्य ते**– (सा. ६५७–९) इति तृचे **पवाऽ५मा । नाऽ३स्यऽ३ तेकावाइ** (ऊ. प्रा. ८१२) इति च त्रीणि सामानि **यज्ञायज्ञीयानी**त्युच्यन्ते ॥११॥

ससु–शिक्षा सफ-ष्कले कचौ ॥१२॥

स सुन्वे– (सा. १०९९) इत्यस्यामृचि **ससुन्वोऽ३यः। वासूऽ२३४नाम्** (ऊ. प्रा. ८१३) इति **सफम्, उप शिक्षापतस्थुषः**– (सा. ७९१) इत्यस्याम् **उपशीऽ३क्षाप । तस्थूऽ२३४षाः** (ऊ. प्रा. ८१४) इति **पौष्कलं** चेति सामनी गीयेते ॥१२॥

मत्स्यलेयं तृचे ॥१३॥

मत्स्यपायि ते– (सा. १४३२–४) इति **तृचे मत्सियाऽ३पायितेमहाः** (ऊ. प्रा. ८१५) इति **कालेयसंज्ञं** साम भवति ॥१३॥

स्वासु धसमुत्तरयोः ककुप् ॥१४॥

तं वो दस्मम्– (सा. ६८५–६) इति ऋचोः **स्वासु** स्वकीयासु स्तोत्रीयासु **ताऽ२३४म् । वोदस्ममृती । षाहाम्** (ऊ. प्रा. ८१६) इति ककुबुत्तरनौधससंज्ञं साम भवति ॥१४॥

आ त्वा लेयम् ।।१५।।

आ त्वा रथम्– (सा. १७७१–३) इति तृचे **आत्वाराऽ३थंयथोतयाइ** (ऊ. प्रा. ८१७) इति **कालेयनामकं** साम गीयते ।।१५।।

परि प्र धन्व पौष्कलमेकस्याम् ।।१६।।

परि प्र धन्व–(सा. १३६७) इत्येकस्यामृचि **परिप्राऽ३ध । न्वाईऽ२३४न्दा** (ऊ. प्रा. ८१८) इति यत् साम गीयते तत् **पौष्कलमिति** कथ्यते ।।१६।।

स्वादि कौत्समैडे ।।१७।। प्रथमः ।।१।।

स्वादिष्ठया– (सा. ६८९–९१) इति तृचे **स्वादीहिष्ठाऽ२३ । यामदिष्ठयाईया** (ऊ. प्रा. ८१९) **इत्यैडकौत्ससंज्ञं** साम भवति ।।१७।।

अयं **प्रथमो** विंशः

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगाने प्रायश्चित्तपर्वणि पञ्चदशः खण्डः ।।१५।।

[ऊहगाने प्रायश्चित्तपर्वणि षोडशः खण्डः]

सखा क्रौञ्चम् ।।१।।

सखायो दीर्घजिह्व्यम्– (सा. ६९७b–८) इति सपादर्चि मध्यमस्तोत्रीयायां **सखायोदाइ** (ऊ प्रा. ८२०) इति **क्रौञ्चसंज्ञं** साम भवति ।।१।।

अयं पूषेति यद् द्वितीयमेवाभरम् ।।२।।

अयं पूषा रयिर्भगः–(सा. ५४६) इत्यस्यामृचि ग्रामेगेये **यद् द्वितीयं** क्रौञ्चं **गीयते** तद्रूप**मेव एवाह्यसि**– (सा. ८२४–६) इत्यस्मिन् तृचे **एवाऽ३होऽ३असिवीरयोवा** (ऊ. प्रा. ८२१) इति गीयमानं साम **सौभर**मित्युच्यते ।।२।।

इन्द्रं विश्वा मेंधम् ।।३।।

इन्द्रं विश्वा अवीवृधन्– (सा. ८२७–९) इति तृचे **इन्द्रंविश्वाअवीवृधाऽ३ने** (ऊ. प्रा. ८२२) इति **नार्मेधनामकं** साम गीयते ।।३।।

इन्द्रायाहि धियेे गायन्ति लेयम् ।।४।।

इन्द्रायाहि– (सा. ११४६–८) इति तृचे **इन्द्रायाऽ३हिधियेषिताः** (ऊ. प्रा. ८२३) इत्यारभ्य **कालेय**नामकं साम गीयते । परमत्रेदमवधेयं यदस्मिन् साम्नि, **इन्द्रा याहि चित्रभानो**- (सा. ११४६) इति या प्रथमा ऋग् भवत्यस्य तृचस्य सा क्रियते द्वितीया । **या इन्द्रा याहि धियेषितो**– (सा. ११४७) इति वर्तते द्वितीया सा क्रियते प्रथमा ।।

गायन्ति त्वा– (सा. १३४४–६) इति तृचे **गायन्तऽ३त्वागायत्रिणाः** (ऊ. प्रा. ८२४) इति यद् गीयते साम तदपि **कालेय**मित्युच्यते ।।४।।

आ य॰ पुरमग्ने त कमश्वम् ।।५।।

आ य॰ पुरम्– (सा. १७७४–६) इति तृचे आय॰**पूऽ३रन्नार्मिणीऽमा** (ऊ. प्रा. ८२५) इति, **अग्ने तमद्य**– (सा. १७७७–९) इति तृचे **अग्नेताऽ३मद्याऽश्वन्ना** (ऊ. प्रा. ८२६) इति च **साकमश्व**नाम्नी सामनी भवतः ।।५।।

एना प्रत्यू इमा उ वामिति चैकैकस्मिन्
वार–देव्य–श्रुध्यानि ।।६।।

एना वो अग्निम्– (सा. ७४९–५०) इति, ऋचो**रेनावोआऔहोहाइ** (ऊ. प्रा. ८२७) इति, **प्रत्यु अदर्शि**– (सा. ७५१–२) इति ऋचोः **प्रत्युवदाऔहोहाइ** (ऊ. प्रा. ८२८) इति, **इमा उ वाम्**– (सा. ७५३–४) इति ऋचो**रिमाउवाओहोहाइ** (ऊ. प्रा. ८२९) इति च **वारवन्तीयानि** भवन्ति । तेष्वेव ऋग्द्वयेषु **आऽ५इना । वोआऽ३ग्नाऽ३इन्नमसा** (उ. प्रा. ८३०) इति, **प्राऽ५त्यु । अदाऽ३र्शोऽ३आयताइ** (ऊ. प्रा. ८३१) इति, **आऽ५इमाः। उवाऽ३न्दाऽ३ इविष्टयाः** (ऊ. प्रा. ८३२) इति च त्रीणि **वामदेव्य**संज्ञानि सामान्यपि गीयन्ते । पुनरपि तेष्वेव ऋग्द्वयेषु क्रमशः **एनावोआ२ऽग्निम् नमसोवा** (ऊ. प्रा. ८३३) इति, **प्रत्यवदाऽ२र्शि । आयतोवा** (ऊ. प्रा. ८३४) इति, **इमाउवाऽ२न्दि । विष्टयोवा** (ऊ. प्रा. ८३५) इति च त्रीणि **श्रुध्य**नामकानि च सामानि गीयन्ते । इत्येवमेकैकस्मिन् ऋग्द्वय इमानि त्रीणि सामानि क्रमशो भवन्ति ।।६।।

संधावग्ने विवस्वेति च तानि ।।७।।

अग्ने विवस्वदुषसः– (सा. १७८०–१) इति ऋचोश्च **संधौ** एकैकशः **तानि** उपर्युक्तानि सामानि भवन्ति । यथा– **अग्नेविवाऔहोहाइ** (ऊ. प्रा. ८३६) इति **वारवन्तीयम्**; **आऽ५ग्ने ।**

विवा३स्वा३दुषसाः (ऊ. प्रा. ८३७) इति **वामदेव्यम्**; अग्नेविवा२स्वत् । **उषसोवा** (ऊ. प्रा. ८३८) इति **श्रुध्यं** च ॥७॥

यज्ञा महावैश्वामित्रे ॥८॥ द्वितीयः ॥२॥

यज्ञायज्ञा वो–(सा. ७०३–४)इति ऋचोः हयाइ । हया३ । **ओहाओहा** (त्रीणि त्रिः) **यज्ञायज्ञा**(ऊ. प्रा. ८३९) इति **महावैश्वामित्रनामकं** साम गीयते ॥८॥

अयं द्वितीयो विंशः ॥

इति पुष्पसूत्रे द्वितीये प्रपाठके ऊहगाने प्रायश्चित्तपर्वणि षोडशः खण्डः ॥१६॥

[ऊहगाने प्रायश्चित्तपर्वणि सप्तदशः खण्डः]

एतास्वेव दैर्घम् ॥१॥

एतास्वेव पूर्वोक्तासु स्तोत्रियास्वेव **यज्ञायज्ञावोअग्नयओहाओहा३ए** (ऊ. प्रा. ८४०) इति **दैर्घश्रवसं** साम गीयते ॥१॥

अचिक्र हितम् ॥२॥

अचिक्रदद्वृषा–(सा. १०४२–४) इति तृचे **अचिक्रदद्वृ । षा२हराइः** (ऊ. प्रा. ८४१) इति **सँहितसंज्ञं** साम भवति ॥२॥

पवस्व वषट्कर्चः ॥३॥

पवस्व वाजसातये– (सा. १०१६) इत्यस्यामृचि **पवस्ववाजसातये** (ऊ. प्रा. ८४२) **इति वषट्कारणिधननामकं** साम गीयते ॥३॥

पुरो ज्ञीयमुत्तरे गायत्र्याम् ॥४॥

पुरोजिती वो–(सा. ६९७–९) इति तृचे, यत्र **चोत्तरे** द्वितीयतृतीये **ऋचौ गायत्र्यां स्तत्र, पुरो५जि । ता३इवो३अन्धासाः** (ऊ. प्रा. ८४३) इतीदं साम **यज्ञायज्ञीयाख्यं** गीयते । **अत्रोत्तरेगायत्र्या**मिति स्पष्टार्थम् ॥४॥

विधुं वषट् ॥५॥

विधुं दद्राणम्– (सा. १७८२–४) इति तृचे **विधुन्ददाण౮समने** (ऊ. प्रा. ८४४) इति **वषट्कारणिधना**भिधं साम भवति ॥५॥

बण्म किमित्तो विते ॥६॥

बण्महाँ असि– (सा. १७८८–९) इति ऋचोः **बण्म । हा౮आऽ३ । सिसूस्यिा** (ऊ. प्रा. ८४५) इति, **किमित्ते विष्णो**– (सा. १६२५–७) इति तृचे **किमित्** । तेवाऽ३इ । ष्णोपरिचा (ऊ. प्रा. ८४६) इति च **गौरोवित**नामनो सामनी भवतः ॥६॥

श्रायन्तीयं पवस्वान्धी पवस्व सोमोत्सो द्यौतानमेकर्च्चा: ॥७॥
प्रायश्चित्तानि ॥६॥

पवस्व वाजसातये– (सा. १०१६) इत्यस्यामृचि **पवस्व वाजसाऽ१तायाइ** (ऊ. प्रा. ८४७) इति **श्रायन्तीयम्**, **पवस्व सोम**– (सा. १२४१) इत्यस्याम् **पाऽ१वास्वा । सोऽ२३मा** (ऊ. प्रा. ८४८) इत्यान्धीगवम्; **उत्सो देवो हिरण्ययः**– (सा. ६७५d –६ab) इति पादत्रये द्वितीयस्तोत्रीयायां हाऽ३। आऽ३हाऽ३ (द्विः) **हाइ । उत्सोदेवोऽ२** (ऊ. प्रा. ८४९) इति **द्युतानं** चेति त्रीणि सामानि गीयन्ते ॥७॥

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगाने प्रायश्चित्तपर्वणि सप्तदशः खण्डः ॥१७॥

इति श्री**शेणई**कुलोत्पन्नेन बेल्लिक्कोत्तुग्रामजन्मना जनार्दनशर्मणस्तनूजेन
रामचन्द्रशर्मणा प्रणीतायां साधनाख्यायां पुष्पसूत्रव्याख्यायां
द्वितीये प्रपाठक ऊहगाने प्रायश्चित्तपर्व समाप्तम् ॥६॥

ऊहगाने क्षुद्रपर्व

अष्टादशः खण्डः

अभि त्वा कण्वरमुत्तरे ककुभौ ॥१॥

अभि त्वा शूर- (सा. ६८०-१) इति ऋचोरभित्वाशूरनोनुमाः (ऊ. क्षु. ८५०) इति **ककुबुत्तराकण्वरथन्तरसंज्ञं** साम भवति ॥१॥

इन्दुनौधसश्यैते ॥२॥

इन्दुरश्वो न कृत्व्यः- (सा. ६९८०-९) इति सपादर्चि तृतीयस्तोत्रीयायां **आऽ२३४इ । दुरश्वोनकृ** (ऊ. क्षु . ८५१) इति **नौधसम्, इन्दुरश्वोनकृ । त्वियाऽ३४औहोवा** (ऊ. क्षु. ८५२) इति **श्यैतं** चेति सामनी गीयेते ॥२॥

स नः कौत्समैडम् ॥३॥

स न इन्द्राय- (सा. ६७३) इत्यस्यामृचि **सनाहोन्द्राऽ२३ । ययज्यवद्दया** (ऊ. क्षु. ८५३) **इत्यैडकौत्सनामकं** साम भवति ॥३॥

उत्सो धसम् ॥४॥

उत्सो देवो- (सा. ६७५d -६ ab) इति पादत्रये मध्यमस्तोत्रीयायाम् **ऊऽ२३४त् । सो देवोहिर । ण्ययाः** (ऊ. क्षु. ८५४) इति **नौधसं** साम गीयते ॥४॥

पुरस्तृचे पारमभ्यस्तम् ॥५॥

पुरोजिती वो- (सा. ६९७-९) इति **तृचे पुरोजितीवोअन्धसः । पूऽ२३४** (ऊ. क्षु. ८५५) इति **द्विरभ्यस्तमाकूपारनामकं** साम भवति ॥५॥

यत् पुर उत्सः श्यैते पुरो धसमेकर्च्चाः ॥६॥

पुरोजिती वो- (सा. ६९७) इत्यस्यामृचि **पुरोजितीवोअ । धसाऽ३४औहोवा** (ऊ. क्षु. ८५६) इति **यत्** साम गीयते तत्, **उत्सो देवो-** (सा. ६७५d -६ab) इति पादत्रये मध्यमस्तोत्रीयायाम् **उत्सोदेवोहिर । ण्ययाऽ३४औहोवा** (ऊ. क्षु. ८५७) इति च

यद् गीयते तदपि **श्यैत**नाम्ना विदितं भवति । तथैव **पुरोजितीवो**– (सा. ६९७) इत्यस्यामृचि **पू**ऽ२३४ । **रोजितीबोअ । धासाः** (ऊ. क्षु. ८५८) इति यत् साम गीयते **तन्नौधससंज्ञं** भवति ।।६।।

तं वो नौधसश्यैतम् ।।७।।

तं वो दस्मम्– (सा. ६८५–६) इति ऋचोस्ताऽ२३४**म्** । **वोदस्ममृतो । षाहाम्** (ऊ. क्षु. ८५९) इति **नौधसश्यैत**नामकं साम भवति ।।७।।

अभि प्र वः श्यैतनौधसम् ।।८।।

अभि प्र वः– (सा. ८११–२) इति ऋचोर**भिप्रवस्सुरा** (ऊ. क्षु. ८६०) इति **श्यैतनौधस**-संज्ञं साम भवति ।।८।।

अभि त्वा त्वामिद्धि वारे ।।९।।

अभि त्वा शूर– (सा. ६८०–१) इति ऋचोर**भित्वाशाऔहोहाइ** (ऊ. क्षु. ८६१) इति, **त्वामिद्धि –**(सा. ८०९–१०) इति ऋचो**स्तुवामिद्धाऔहोहाइ** (ऊ. क्षु. ८६२) इति च **वारवन्तीय**नामनी सामनी भवतः ।।९।।

तं वो दाभि प्र वः क्रौञ्चे ।।१०।।

तं वो दस्मम्– (सा. ६८५–६) इति ऋचो**स्तंवोदास्माऽ३१२३४ म् । ऋतो** (ऊ. क्षु. ८६३) इति, **अभि प्र वः**– (सा. ८११–२) इति ऋचोर**भाइप्रावाऽ३१२३४: । सुरा** (ऊ. क्षु. ८६४) इति द्वे अपि **वाङ्निधनक्रौञ्च**नामनी सामनी भवतः ।।१०।।

अभि त्वा पूर्वं कण्वरम् ।।११।।

अभि त्वा पूर्वपीतये–(सा. १५७३–४**)** इति ऋचोरा**भित्वापूर्वपीतयाइ** (ऊ. क्षु. ८६५) इति **कण्वरथन्तराख्यं** साम गीयते ।।११।।

त्वामि त्वँह्योहि कण्वबृहत् ।।१२।।

त्वामिद्धि– (सा. ८०९–१०) इति ऋचो**रौहोतुवामिद्धाऽ३ए** (ऊ. क्षु. ८६६) इति, **त्वँह्येहि**– (सा. १५८१–२) इति ऋचो**रौहोतुवँहियाऽ३ए** (ऊ. क्षु. ८६७) इति च **कण्वबृहन्नामनी** सामनी गीयेते ।।१२।।

यद्या यदि महावैष्टम्भे ॥१३॥ प्रथमः ॥१॥

यद्याव इन्द्र– (सा. ८६२–३) इति ऋचोर्यद्यावओहाइ (ऊ. क्षु. ८६८) इति, **यदिन्द्र–** (सा. १७६६–७) इति ऋचोर्यदिन्द्रयोहा (ऊ. क्षु. ८६६ इति **च द्वयमपि महा-वैष्टम्भ**नामकं साम भवति ॥१३॥

अथ **प्रथमो** विंशः ॥

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगाने क्षुद्रपर्वण्यष्टादशः खण्डः ॥१८॥

–◆–

[ऊहगाने क्षुद्रपर्वण्येकोनविंशः खण्डः]

पिबा श्रुधीति च तमसम् ॥१॥

पिबा सोमम्– (सा. ६२७–९) इति तृचे **हाउपिबा । सोममिन्द्र । मा** (ऊ. क्षु. ८७०) इति, **श्रुधी हवम्–** (सा. १७९८–८००) इति तृचे **हाउश्रुधाइ** (ऊ. क्षु. ८७१) इति च द्वे अपि **सहोदैर्घतमस**नामनी **(दैर्घतमस**नामनी वा **)** सामनी भवतः ॥१॥

एतास्वेव मरायम् ॥२॥

पिबा सोमम्– (सा. ६२७–९) इति तृचे **हाउहाउहाउ । पाइबा । सोमाम्** (ऊ. क्षु. ८७२) इति, **श्रुधी हवम्–**(सा. १७९८–८००) इति तृचे **श्रुधाइ । हवाम्** (ऊ. क्षु. ८७३) इति च **एतास्वेव** स्तोत्रीयासु **मराया**ख्ये सामनी गीयेते ॥२॥

रेवाँ इद्रा वारम् ॥३॥

रेवाँइद्रेवतः– (सा. १८०४–६) इति तृचे **रेवाँइद्राऔहोहाइ** (ऊ. क्षु. ८७४) इति **वारवन्तीया**भिधं साम गीयते ॥३॥

प्रसो प्रसु कण्वतरम् ॥४॥

प्र सोम– (सा. ७६७–८) इति ऋचोः **प्रसोमदेववीतयाइ** (ऊ. क्षु. ८७५) इति **प्र सुन्वानाय–** (सा. १३८६–८) इति तृचे **प्रसुन्वानायअन्धसाः** (ऊ. क्षु. ८७६) इति **च द्वे** अपि सामनी **कण्वरथन्तरे** इति कथ्येते ॥४॥

पुना पूषा कण्वबृहत् ।।५।।

पुनानः सोम धारय–(सा. ६७५–७) इति तृचे **औहोपुनानस्सोऽ३ए** (उ. क्षु. ८७७) इति **अयं पूषा रयिः**– (सा. ८१८–२०) इति तृचे **ओहो अयंपूषाऽ३ए** (ऊ. क्षु. ८७८) इति च द्वे अपि सामनी **कण्वबृहती** इति ब्रूयेते ।।५।।

अभि सो सुतासो ष्टम्भे ।।६।।

अभि सोमासः–(सा. ८५६–७) इति ऋचोर**भिसोमोहाइ** (ऊ. क्षु. ८७९) इति, **सुतासो मधुमत्तमाः**– (सा. ८७२–४) इति तृचे **सुतासोमोहाइ** (ऊ. क्षु. ८८०) इति च द्वे अपि **महावैष्टम्भसंज्ञे** सामनी भवतः ।।६।।

तव पुर इति तमसम् ।।७।।

तवाहं– (सा. ९२२–३) इति ऋचो**र्हाउतवा । अहऀसो** (ऊ. क्षु. ८८१) इति, **पुरोजितो वो**– (सा. ६९७–९) इति तृचे **हाउपुराःजाइतो** (ऊ. क्षु. ८८२) इति च द्वे अपि **सहोदैर्घतमसना**मनी **(दैर्घतमसनामनी वा)** सामनी भवतः ।।७।।

एतास्वेव मरायम् ।।८।।

एतास्वेव पूर्वोक्तासु स्तोत्रीयासु **हाउहाउहाउ । तवा** (ऊ. क्षु. ८८३) इति, **पुराः । जाइतीवोअन्धसाः** (ऊ. क्षु. ८८४) इति च द्वे **मरायना**मनी सामनी गीयेते ।।८।।

इन्द्रायेन्दो वारम् ।।९।।

इन्द्रायेन्दो–(सा. १०७६–८) इति तृचे **इन्द्रायेन्दाऔहोहाइ** (ऊ. क्षु. ८८५) इति **वारवन्तीयसंज्ञं** साम भवति ।।९।।

इममासितम् ।।१०।।

इममिन्द्र– (सा. ९४९–५१) इति तृचे **इममिन्द्रसुताम्** (ऊ. क्षु. ८८६) इत्**यासिताख्यं** **(आसितं** वा) साम गीयते ।।१०।।

असा त्वाष्ट्री ।।११।।

असावि सोमः– (सा. १०२८–३०) इति तृचे **असाविसोऽ३हा** (ऊ. क्षु. ८८७) इति **स्वारं त्वाष्ट्रीसाम** भवति ।।११।।

यदिन्द्र चि प्रियम् ।।१२।।

यदिन्द्र चित्र–(सा. ११७२–४) इति तृचे **यदिन्द्राऽ२३। चित्रमद्दह । नास्ती** (ऊ. क्षु. ८८८) इति **वसिष्ठप्रियाख्यं** साम गीयते ।।१२।।

पुरांभिन्दुर्महावैश्वामित्रे ।।१३।। द्वितीयः ।।२।।

पुरां भिन्दुः–(सा. १२५०–२) इति तृचे **हयाइ। हयाऽ३। औहाओहा** (त्रीणि त्रिः) । **पुरांभिन्दुः** (ऊ. क्षु. ८८९) इति **महावैश्वामित्र**नामकं साम गीयते ।।१३।

अयं **द्वितीयो** विशः ।।

इति पुष्पसूत्रे द्वितीये प्रपाठक **ऊहगाने क्षुद्रपर्वण्येकोनविंशः** खण्डः ।।१९।।

[ऊहगाने क्षुद्रपर्वणि विंशः खण्डः]

गायन्ति साभ्यासं त्वाष्ट्री ।।१।।

गायन्ति त्वा–(सा. १३४४–६) इति तृचे **गाय । तित्वाऽ३। हाऽ३ह्वा** (ऊ. क्षु. ८९०) इति **द्विरभ्यासं त्वाष्ट्रीसाम (अभ्यस्तं त्वाष्ट्रीसाम** वा) भवति ।।१।।

एन्द्रया क्रौञ्चाद्यम् ।।२।।

एन्द्र याहि–(सा. १८०७–९) इति तृचे **एन्द्रयाहौहो** । हौहरिभाइः (ऊ. क्षु. ८९१) इति **क्रौञ्चाद्यं** साम गीयते ।।२।।

इममसा गायम् एन्द्रया च वितानि ।।३।।

इममिन्द्र– (सा. ९४९–५१) इति तृचे **इमम् । इन्द्राऽ३। सुतंपिबा** (ऊ. क्षु. ८९२) इति, **असावि सोमः**–(सा. १०२८–३०) इति तृचे **असा । विसोऽ३। मइन्द्रताइ** (ऊ. क्षु. ८९३) इति, **गायन्ति त्वा**– (सा. १३४४–६) इति तृचे **गाय । तित्वाऽ३। गायत्रिणाः** (ऊ. क्षु. ८९४) इति, **एन्द्र याहि**– (सा. १८०७–९) इति तृचे **एन्द । याहाऽ३इ। हरिभाइः** (ऊ. क्षु. ८९५) इति च चत्वारि **गौरीवितानि** सामानि गीयन्ते ।।३।।

देवः कण्वरम् ॥४॥

देवो वो– (सा. १५१३–४) इति ऋचोर्**देवोवोद्रविणोदाः** (ऊ. क्षु. ८९६) इति यत् साम गीयते तदुच्यते **कण्वरथन्तरमिति** ॥४॥

यज्ञा कण्वबृहत् ॥५॥

यज्ञायज्ञा वो– (सा. ७०३–४) इति ऋचोरौ**होयज्ञायज्ञाऽ३ए** (ऊ. क्षु. ८९७) इतीदं गीयमानं साम **कण्वबृहद्**िति कथ्यते ॥५॥

पुरो वात्सप्रम् ॥६॥

पुरोजिती वो– (सा. ६९७–९) इति तृचे **हाउहाउहाउ । ओ । होहोवा** । (द्वे त्रिः) । **पुरोजिताइ** (ऊ. क्षु. ८९८) इति गीयमानं साम **वात्सप्रमि**ति निगद्यते ॥६॥

जनिता ज्ञीयम् ॥७॥

सोम४ पवते– (सा. ९४३–५) इति तृचे **सोमाऽ५:प । वाऽ३ताऽ३इजनिता** (ऊ. क्षु. ८९९) इति **यज्ञायज्ञीयसंज्ञं** साम भवति ॥७॥

स्वासु मरायम् ॥८॥

अग्निन्नरः–(सा. १३७३–५) इति तृचे **स्वासु** स्तोत्रियासु **हाउहाउहाउ । आग्नीम् । नराः** (ऊ. क्षु. ९००) इति **मरायनामकं** साम गीयते ॥८॥

त्वं द्यां शुद्धा सुष्वा पारं कच्चौ ॥९॥

त्वं द्यां च– (सा. १०१८) इत्यस्यामृचि **त्वंद्याञ्चमहीव्रता** (उ. क्षु. ९०१) इति **शुद्धाशुद्धीयम् (पदनिधनशुद्धाशुद्धीयं वा), सुष्वाणासो**– (सा. ११०३) इत्यस्यां **सुष्वाणाऽ२३ सोवि । अद्राऽ२३४इभाइः** (ऊ. क्षु. ९०२) इत्याकूपारं चेति सामनी गीयेते ॥९॥

सोमाः पवन्त प्रीयम् ॥१०॥

सोमा४ पवन्ते–(सा. ११०१–३) इति तृचे **सोमाऽ५४प । वाऽ३न्तोऽ३इन्दावाः** (ऊ. क्षु. ९०३) इति **यज्ञायज्ञीयं** साम भवति ॥१०॥

स्वासु वाराद्यम् ॥११॥

अश्वं न त्वा–(सा. १६३४–६) इति तृचे **स्वासु** स्तोत्रीयासु **आश्वा । औहोऽ२३४ वा** (ऊ. क्षु. ९०४) इति **वारवन्तीयाद्यं (पूर्ववारवन्तीयं वा)** साम गीयते ॥११॥

जनिता श्यावाश्वम् ।।१२।।

सोम॒ पवते– (सा. ९४३–५) इति तृचे **सोम॒पवा । तेजनितामताऽ२इनाउवा** (ऊ. क्षु. ९०५) इति **श्यावाश्वसंज्ञं (त्रिष्टुप्श्यावाश्वसंज्ञं वा)** साम भवति ।।१२।।

प्रते शैखण्डिनम् ।।१३।।

प्र त आश्विनीः– (सा. ८८६–८) इति तृचे **प्रताऽ३होइ । आश्वीऽ३होऽ२३४** (ऊ. क्षु. ९०६) इति **शैखण्डिन**नामकं साम गीयते ।।१३।।

गोविच्छ्येनः ।।१४।।

गोवित्पवस्व– (सा. ९५५–७) इति तृचे **गोवित्पवस्ववसुवाइत्** (ऊ. क्षु. ९०७) इति यत् साम गीयते तत् **श्येन** इत्युच्यते ।।१४।।

तं त्वा हवद्वैव्यम् ।।१५।।

तं त्वा विप्राः– (सा. १०७७) इत्यस्यामृचि **तन्त्वाविप्रावचोविदः** (ऊ. क्षु. ९०८) इति **इहवद्वामदेव्यसंज्ञं** साम भवति ।।१५।।

रसं मार्गीयवे ।।१६।। तृतीयः ।।३।।

रसं ते मित्रो– (सा. १०७८) इत्यस्यामृचि **रसौहोवा । तोंमाऽ२इ** (ऊ. क्षु. ९०९) इति **मार्गीयवाभिधं साम** गीयते ।।१६।।

अयं **तृतीयो** विंशः ।।

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगाने क्षुद्रपर्वणि विंशः खण्डः ।।२०।।

[ऊहगाने क्षुद्रपर्वण्येकविंशः खण्डः]

अया पवा वार्त्रतुरम् ।।१।।

अया पवा– (सा. ११०४–६) इति तृचे **अयापवोवा** (ऊ. क्षु. ९१०) इति **वार्त्रतुर-संज्ञं साम गीयते** ।।१।।

ज्योतिर्जागतं वरुणसाम ।।२।।

ज्योतिर्यज्ञस्य– (सा. १०३१–३) इति तृचे **ज्योतिर्य । ज्ञाऽ३स्यपवते** (ऊ. क्षु. ६११) इति **जागतं वरुणसाम** गीयते ।।२।।

प्रवत् प्र का ।।३।।

प्र काव्यम्– (सा. १११६–८) इति तृचे **प्रकावियाम् । उशनेवा** (उ. क्षु. ६१२) इति **प्रवद्भार्गव**संज्ञं साम भवति ।।३।।

शिशुमुद्वत् ।।४।।

शिशुं जज्ञानम्– (सा. ११७५–७) इति तृचे **शिशुञ्जज्ञाऽ२३ । नꣳहर्यताऽ२३म्** (ऊ. क्षु. ६१३) इत्यु**द्वद्भार्गवा**ख्यं साम गीयते ।।४।।

अक्रान्त्सामराजम् ।।५।।

अक्रान्त्समुद्रः– (सा १२५३–५) इति तृचे **हाउहोवाऽ३हाइ । अक्रान्त्समुद्रऽ३ःप्रा** (ऊ. क्षु. ६१४) इति **सामराज**संज्ञं साम भवति ।।५।।

प्र का रथीयम् ।।६।।

प्र काव्यम्– (सा. १११६–८) इति तृचे **होऽ४वा । उहुवाऽ३। हावा । प्रकावियाम्** (ऊ. क्षु. ६१५) इति **कुत्सस्याधिरथीयं** साम भवति ।।६।।

शिशुं ज्योतिषम् ।।७।।

शिशुञ्जज्ञानम्– (सा. ११७५–७) इति तृचे **हाउहोवाऽ३हाइ । शिशुंजज्ञानꣳहर्याऽ३ तामृजन्ताऽ२३४५इ** (ऊ. क्षु. ६१६) इतीदं साम **वैश्वज्योतिष**मित्युच्यते ।।७।।

अक्रां ज्योतिषवात्सप्रे ।।८।।

अक्रान्त्समुद्रः– (सा. १२५३–५) इति तृचे **हाउहोवाऽ२होइ । अक्रान्त्समुद्र४प्रथमेऽ३४३ विधर्मन्** (ऊ. क्षु. ६१७) इति **वैश्वज्योतिषम्, होईऽ२ । अक्रान्त्समुद्र४प्रथ** (ऊ. क्षु. ६१८) इति **वात्सप्रं (वात्सप्राद्यं** वा) चेति सामनी गीयेते ।।८।।

भृङ्गमा जा ॥९॥

आ जागृविः– (सा. १३५७–९) इति तृचे **आजागृर्विविप्रः** (ऊ. क्षु. ६१९) **इति गौभृङ्गाख्यं** साम गीयते ॥९॥

पुना यामेऽत्रैव गोराङ्गिरसम्॥१०॥

पुनानो अक्रमीदभि– (सा. ६२४–६) इति तृचे **पुनानोआऽ२। क्रमीदाऽ२३४भी** (ऊ. क्षु. ६२०) इति **यामाद्यम्** (**पूर्वयामं** वा), **पुनाना अक्रमीदभि । ओहाऽ३ओहा** (ऊ. क्षु. ६२१) इति **यामोत्तरम्, अत्रैव** तृचे पुनरपि **ओहोइहुऽ३वाऽ२३इ। हुवए। पुनानोआऽ३क्राऽ३ मीदभि** (ऊ. क्षु. ६२२) इति **गोराङ्गिरसस्य साम** चेति त्रीणि सामानि गीयन्ते ॥१०॥

सोमीयमेतमु त्यमिति ॥११॥

एत मु त्यम्–(सा. १०८१–३) इति तृचे **एताऽ३मूत्यन्दशक्षिपाः** (ऊ. क्षु. ६२३) **इत्ययासोमीयनामकं साम** भवति ॥११॥

प्रो वाराहम्॥१२॥

प्रो अयासीद्–(सा. ११५२–४) इति तृचे **हाउहाउ । हुप् । प्रोअयासाइत्**– (ऊ. क्षु. ६२४) इति **वाराहसंज्ञं** साम भवति ॥१२॥

उहुवाइ धर्ता हाउहुवासाबि सिष्ठे ॥१३॥

धर्ता दिवः– (सा. १२२८–३०) इति **तृचे उहुवाइ। धर्ताऽ३४औहोवा** (ऊ. क्षु. ६२५) इति, **असावि सोमो**– (सा. १३१६–८) इति तृचे **हाइ। उहुवाइ। असाऽ३४औहोवा । विसो** (ऊ. क्षु. ६२६) इति **वासिष्ठसंज्ञे** सामनी गीयेते ॥१३॥

प्रोपामीव ॥१४॥

प्रो अयासीद्–(सा. ११५२–४) इति तृचे **प्रोआ। यासीदिन्दुरिन्द्राऽ३स्याऽ३निष्कृतम्** (ऊ. क्षु. ६२७) इति **अपामीवं** (**इन्द्रस्यापामीवं** वा) साम गीयते ॥१४॥

धर्ता क्रन्दे ॥१५॥

धर्ता दिवः–(सा. १२२८–३०) इति तृचे **धर्तादिव१पवतेकृत्वियो** (ऊ. क्षु. ६२८) इति **वायोरभिक्रन्दो** नाम साम भवति ॥१५॥

असावि सिमानांनिषेधे ।।१६।। चतुर्थ : ।।४।।

असावि सोमो–(सा. १३१६–८) इति तृचे **असो । वाहाइ । वाइसोमोअरुषो** (ऊ. क्षु. ६२९) इति **सिमानांनिषधनामकं** साम गीयते ।।१६।।

अयं चतुर्थो विंशः

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगाने क्षुद्रपर्वण्येकविंशः खण्डः ।।२१।।

[ऊहगाने क्षुद्रपर्वणि द्वाविंशः खण्डः]

प्र वाजि बोधीयम् ।।१।।

प्र वाज्यक्षाः– (सा. ११६०–२) इति तृचे **प्रवाजियोवा** (ऊ. क्षु. ६३०) इति **जराबोधीयं** साम गीयते ।।१।।

अदर्शा त्वाभिनिधनं काण्वम् ।।२।।

अदर्शि गातुवित्तमः–(सा. १५१५–७) इति तृचे **औहोहोहाइ । आइही । आदा** (ऊ. क्षु. ६३१) इति, **आ त्वा सहस्रम्**– (सा. १३६१–३) इति तृचे **औहोहोहाइ । आइही । आत्वा** (ऊ. क्षु. ६३२) इति **त्वाभिनिधनकाण्वनामनी** सामनी भवतः ।।२।।

अग्न आ- इन्द्र- बण्म नैपातिथानि ।।३।।

अग्न आ याहि– (सा. १५५२–३) इति ऋचोरग्न **आयाह्यग्निभाऽ३इरे** (ऊ. क्षु. ६३३) इति, **इन्द्रमिद्**– (सा. १५८७–८) इति ऋचोरन्द्र**मिद्देवतातयाऽ३ए** (ऊ. क्षु. ६३४) इति, **बण्महाँअसि**–(सा. १७८८–६) इति ऋचोर्**बण्महाँअसिसूरियाऽ३ए** (ऊ. क्षु. ६३५) इति च त्रीणि **नैपातिथनामानि** सामानि भवन्ति ।।३।।

अच्छा आयन्तीयं क्षुद्राः ॥४॥ आयन्तीयं क्षुद्राः ॥७

अच्छा नः–(सा. १५५४–५) इति ऋचोरच्छ्रानश्शीरशोऽ१चाइषाम् (ऊ. क्षु. ६३६) इति आयन्तीयसंज्ञं साम भवति । द्विरुक्तिरूहगानसमाप्त्यर्था ॥४॥

इति पुष्पसूत्रे द्वितीये प्रपाठक ऊहगाने क्षुद्रपर्वणि द्वाविंशः खण्डः ॥२२॥

